[4] *Bhavaṁ anu na bhūyān mama januh*, that is, liberated. The S'yāmārahasya reads *Bhavaṁ ananubhūyāt*, using *bhavaṁ* as meaning *duhkhaṁ* (pain), arising from *bhava* (the world) (K. B.).

## VERSE 15

He, O Mahākālī,[1] who in the cremation-ground, naked, and with dishevelled hair, intently[2] meditates upon Thee[3] and recites Thy *mantra*, and with each recitation makes offering to Thee of a thousand *Ākaṇda* flowers[4] with seed,[5] becomes without any effort a Lord of the earth.[6]

### Commentary

'*And*' (*Tu*)

For Divya Sādhakas.

'*Mahākālī*'

Or Parabrahmarūpiṇī.

'*Cremation-ground*' (*S'masānasthah*)

The cremation-ground is Parabrahman into which in the great Dissolution (Mahāpralaya) all beings go as though corpses. 'In the cremation ground' therefore, means devoted to Parabrahman.

'*Naked*' (*Dikpatadharah*)

That is, free from the covering of Māyā; whose Consciousness is untainted.

'*Meditates on Thee*' (*Dhyānaniratah*)

That is, upon Thy Saccidānanda aspect. The Rudrayāmala says, 'He who follows the Kula path should do Japa of Mantra seeking protection from Devī who is Consciousness, Bliss and Source of knowledge, who is all Tattvas whose refulgence is that of millions of flashes of lightning.'

'*Sunflowers*' (*Arkānāṁ*)

Flowers of feeling such as compassion, forgiveness and so forth which are functions of the Mind called the Sun in the Brahmarandhra. The Jñānasaṁkalinī-Tantra says, 'Oh Beloved, the mind is seated on the surface of the sun and life on that of the moon.' The

Yājñavalkya-Saṁhitā says, 'The Moon is known to be in the Idā and the sun in the Piṅgalā (Nādī).

*'Self-produced Bīja'* (*Nijagalitavīryena*)

This Bīja is here the nectar which naturally flows from the thousand-petalled Lotus. The Mahānirvāṇa-Tantra says, 'The Heart-Lotus should be offered for seat, the nectar (Amṛta) shed from the Sahasrāra for water to wash the feet, the mind as the offering (Arghya), Memory (Citta) is offered by way of flowers, and the vital airs (Prāṇa) as and by way of incense.' Jñānasaṁkalinī-Tantra says, 'Libation (Tarpana) to the Supreme Liberatrix should be made from out the vessel of the Moon and Arghya should be given from out the vessel of the Sun. Compassion, wisdom, and forgiveness are flowers as is also control of the senses. So too are charity (Dayā) and religious merit. Non-injury (Ahiṁsā) to any being is an excellent flower. Bliss is a flower and so too is the worship of the Sādhaka. Whoever offers these ten flowers attains to the feet of the Liberatrix.' In this verse Savikalpasamādhiyoga is indicated.

NOTES

[1] *Mahākālī*, *S'akti* of *Mahākāla*.

[2] *Susthah* : with undistracted mind. (V)

[3] *Tava dhyāna-niratah*, that is, Upon Thy form.' (V)

[4] *Arka*=Sun flowers known as *Ākaṇda* (V) not the flower so called in English.

[5] *Nija-galita-vīryeṇa kusumaṁ.* Thus the offering is not only of the flowers of the *Ākaṇda* plant, *yatah sādhakah devyai sva-vīrya-mis'ri-tārkapuṣpāṇi samarpayati.* Durgārāma-Siddhāntavāgīs'a cites the Mahākālasaṁhitā as saying that the *sūryapuṣpa* should be offered in the same way with *japa* of the *mūlamantra* (*svavīryamis'rita-sūryapuṣpāṇi*). The *vīrya* does not, refer to the sap of the plant. *Nija* refers to the *sādhaka.* 'Along with, that is dipped in or that is spread over with.' *Mahākāla-samhitā* says, 'A *Kaula-Sādhaka* in the cremation-ground, naked, dishevelled and with tranquil mind, should offer a thousand sun-flowers with seed reciting the while his *Mantra.* After meditating and worshipping with great devotion he should recite the Hymn' (V).

[6] That is, a king or *rājā.* So the Phetkāriṇī-Tantra says that wealth, strength, eloquence, intelligence, and the love of women (*Sarvayoṣitpriyah*) is gained.

## VERSE 16

O KĀLĪ,[1] whoever[2] on Tuesday at midnight,[3] having uttered Thy *mantra*, makes offering even but once with devotion to Thee of a hair of his *S'akti*[4] in the cremation-ground,[5] becomes a great poet, a Lord of the earth, and ever goes mounted upon an elephant.[6]

### COMMENTARY

'*Kālī*'

Dispeller of the fear of Kāla or Death.

'*Whoever*'

Here a Divya Sādhaka.

'*Midday*' *(Madhyāhne)*

At noon.

'*Devotion*' *(Premnā)*

That is Parabhakti.

'*Offers*' *(Vitarati)*

Merges in Thee, that is, attains Nirvikalpa-Samādhi. Pātanjala-Sūtra says that Nirvikalpa-Samādhi is attained by suppression of the Vṛtti of mind.

'*In the cremation-ground*' *(Citāyām)*

In thee as Consciousness (Cit).

'*Bīja*'

That is here nectar which issues on the enjoyment of the union of Kula-kundalinī and Paramas'iva. The Gandharvamālikā-Tantra says, 'Oh beloved One, the Queen of Devas unites with Paras'iva and

in a moment, Oh Devī Parameśvari, nectar is forthwith produced. That nectar, Oh Devī, is like the juice of lac. With it, Oh, Mistress of the Devas, libation (Tarpaṇa) should be offered to the supreme Devatā.'

*'At home' (Gṛhe)*

In the thousand petalled Lotus (Sahasrāra).

*'Hair with its root' (Cikuraṁ samūlaṁ)*

The mind with its functions. It is such Sādhaka who gains both enjoyment and Liberation.

NOTES

[1] *Kālī* is destroyer of *Kāla* (V).

[2] 'Whoever' is here a *Vīra Sādhaka.*

[3] *Madhyāhne.* Noon or (here) midnight, *Kakārakūtarahasya* says, 'Whoever naked and with dishevelled hair, on a Tuesday, at midnight, does *Homa* in the cremation-ground with hair, nails, seed and whatever adheres to the *Sammārjanī* and offers them after having uttered the *Mūlamantra* and recited Thy name a thousand times attracts to him the Lord of the Earth' (V).

[4] The offering is stated in the words *grihe sammārjanyā parigalitabījam hi chikurang samūlang madhyānhe vitarati chitayāng kujadine.* These words have received various interpretations, of which the two chief alternatives are given. *Gṛhe* is by some translated as 'at home,' in distinction from the cremation-ground to which, according to this rendering, the *sādhaka* subsequently goes to make his offering. This, however, is said to be erroneous, as the *sādhanā* takes place not in the house but in the cremation-ground. Others (see Calcutta edition) translate it as the equivalent of *grihinī*, or wife. *Sammārjanī* is by them read to mean 'comb.' *Parigalita* is translated 'removed,' in the sense that the curling of the hair of the wife is 'removed' or straightened with the comb. *Bijam* given either its primary meaning, or as the equivalent of *vīrya* is said to mean *kautilyam*, or curl of the hair. *Cikuram* is 'hair,' and *samūlam* qualifies it, meaning pulled out, taken off at the root. The meaning is, then, an offering is made of the wife's hair, the curls (*kautilyam*) of which have been straightened out with the comb (*sammārjanyā*), and some of which has come off at the root (*samūlam*). The correct rendering, however, is according to K. B. *Śaktisādhakayoḥ gṛhe maithunasamaye*

*yonilimgasamgharṣavaśāt śaktiyonipatitaṁ vīryaliptaṁ loma devyai samarpitaṁ bhavati.* *Gṛhe* thus does not mean 'at home,' but *manmathagrihe.* The hair is from the same. *Saṁmārjanī*=*Śiśna.* *Samūlaṁ* qualifies *cikuram* in the sense of 'come off at the root' under the circumstances stated. *Parigalita* is 'dropped'—referring to the *vīrya.*

According to *Vimalānanda, Gṛhe parigalita-vīryaṁ,* is that produced by union with the *Sādhaka's svaśakti* or wife (V).

Of the words *Gṛhe saṁmārjanyā parigalita-viryaṁ cikuraṁ samūlaṁ* the Commentator Durgārāma Siddāntavāgiśa gives the two following alternative expressions: (*a*) *Sammārjanyā* means with a comb with which the hair is put in order. *Parigalitavīryam chikuram* means hair of which the *Vīrya* or crookedness has been removed. *Gṛhe* means in the wife: for it is said the wife is the home. The whole phrase then means Wife's hair, root and all, combed out straight with a comb or (*b*) *Sammārjanyā parigalita-vīryaṁ* means *Śukra* produced by *Sammārjani* here meaning *Liṅga* of the *Sādhaka; gṛhe* means in the abode of *Kāma* that is *Yoni* of *Śakti* together with hair, root and all.

The English translation is somewhat abbreviated with the object of giving only so much as all renderings are agreed upon. But in practice *Vīrya* is used by most in its literal sense, this is the gross meaning. The inner sense is given in the *Svarūpa-vyākhyā* which follows.

[a] According to some, the offering is made on the built-up pyre, and, according to others, on the fire after the body has been consumed. *Citā,* however, is really used as a synonym for the burning ground (*Smaśāna*). The Niruttara-Tantra (Ch. I) speaks of two Kinds of *Śmaśāna*:

*Śmaśānaṁ dvividhaṁ deva citā yoniḥ prakīrtitaṁ.*

[b] That is, he becomes a *Rājā,* and has no longer to go on foot iike common folk.

## VERSE 17

THE devotee[1] who, having placed before himself,[2] and meditated and again meditated[3] upon, the abode,[4] strewn with flowers,[5] of the *Deva* with the bow of flowers,[6] recites[7] Thy *Mantra*, Ah ![8] he becomes on earth the Lord of Gandharvas,[9] and the ocean of the nectar of the flow of poesy,[10] and is after death in Thy supreme abode.[11]

### COMMENTARY

'*Devotee*' (*Bhaktah*)

The Sādhaka who is a Yogī on the Divya path.

'*The Abode*' (*Kusumadhanusho mandiram*)

The triangular Yoni Mandala in the Mūlādhāra. Nirvāṇa-Tantra says, 'In the triangle, the abode of Kāma, the Liṅga is Maheśvara.'

'*With its own flowers*'

Adorned with the Svayambhu-liṅga which is compared to a flower. Gorakṣa-Saṁhitā says, 'He is truly wise who knows the supreme Tejas in the Yoni called Svayambhu-liṅga. Others are but beasts of burden.

'*Lord of Gandharvas*' (*Gandharva-śreṇīpatih*)

A great singer. It is said 'there is nothing better than a song.'

'*Poesy*' (*Kavitvāmṛta-nadi-nadinah*)

He becomes like the great poet Kālīdāsa.

'*Is great*' (*Prabhavati*)

He attains Nirvāṇa on being united with Thee who are Saccidānandarūpā. Kūrma-Purāṇa says, Brahmavādīs have learnt in all Vedas and Vedāntas the one, omnipresent, subtle (Kūtastha), immovable, absolute, endless, undecaying Brahman, the sole supreme Niṣkala-Tattva higher than the highest, eternal, auspicious, wondrous.' Devīgītā says 'Oh Mountain, he in whom Parabhakti is thus generated becomes merged in Pure Consciousness.'

## Notes

[1] *Bhaktah*: here the *Vira Sādhaka* (V).

[2] *Purah*: that is with the *Mandala of Kāma* before him (V).

[3] That is, with intensity. *Dhyāyan dhyāyan*, repeatedly meditating (V).

[4] *Kusuma-dhanuṣo mandiraṁ*. The Deva with the bow of flowers is *Kāma* whose abode is the *Madanāgāra*. *Tantrakalpadruma* says, 'He who recites the *Mantra* ten thousand times meditating on the flower-covered *Yoni* (*Svapuṣpairākīrṇam*) of *S'akti*, of a certainty charms all with his poesy.' *Svapuṣpa* is called *Svayaṁbhukusuma* in *Tantra-s'āstra*, *Mātṛkābheda-Tantra* says, 'Oh Lady of *Mahes'a Svapuṣpa*, which charms all is the *Ṛtu* which first appears in a married girl (V).

[5] *Svapuṣpairākīrṇam*. The word *svapuṣpa=svayambhupuṣpa*—mentioned in the Tantras. The word *puṣpa* has here, and in ordinary parlance, a figurative sense, as in English. For *puṣpas'abdena atra ṛtur ucyate, mātṛkābheda-tantra-pramāṇānusāreṇa anūḍhāyāh kanyāyāh prathama eva ṛtur atra ucyate. Tantrāntare tu vivāhitāyā eva bālāyā ṛtur atra vivakṣitah.* The S'yāmārahasya reads '*supuṣpa*,' which literally means. pleasing fragrant flower, but which is possibly a misprint for *svapushpa*. The meaning of the passage is as follows: *Sādhakah svasya purobhāge s'aktiṁ saṁsthāpya tasyā ṛturudhirasiktāṁ yoniṁ avalokayan san devīmantraṁ japati.*

[6] That is, *Kāma*, the *Deva* of Desire, whose bow and arrows are made of flowers.

[7] *Japati*. Recites ten thousand times (V).

[8] *Aho*. 'Ah' an exclamation of wonder (V).

[9] Celestial spirits (*devayoni*), who play and sing at the banquets of the *Devas*. According to the Viṣṇu-Purāṇa, sons of Brahmā 'born imbibing melody.' The *Sādhaka* thus becomes a master of dance, music and song.

*Gandarva-s'reṇīpatih.* He becomes a great singer and a master of melody. The *Sāhasānka* says, '*Hāhā* is called a *Gandharva* and singing also makes a *Gandharva*' (V).

[10] He becomes a *Pandita* in all literature. The Kālī-Tantra, quoted in the Kālīkalpalatā, says that in strength he becomes like the wind, in wealth of gifts like Indra, and in the musical art like Tumburu (K.B.)—a *Ṛṣi*, master of music and inventor of the *tāmbur*.

[11] *Paramapadalinah prabhavati*, that is, he attains *nirvāṇa* (K.B.).

*Prabhavati*: becomes capable of creating and so forth on being merged with Thy Supreme Feet (V). The word literally means 'Excels.'

## VERSE 18

He who at night, when in union with his *S'akti*,[1] meditates with centred mind[2] on Thee, O Mother with gently smiling face, as on the breast of the corpse-like S'iva, lying on a fifteen-angled yantra[3] deeply enlisted in sweet amorous play with Mahākāla,[4] himself becomes the destroyer of the God of Love.[5]

### Commentary

'*Mother*' (*Jananī*)

The Progenitrix.

'*At night*' (*Naktaṁ*)

Midnight. Brihannīla-Tantra says, 'He who is intent on meditation at midnight or early dawn surely sees the supremely blissful aspect of Devī.'

'*Meditates*' (*Dhyāyet*)

'On Thee as not different from the Sādhaka's own Ātmā, who art Cidābhāsa in his body as a Yantra.' Gandharva-Tantra says, 'He who is in Advaitabhāva, and thinks of the self as Devatā in the hree forms of body thinks of Her and his Ātmā as one. He should worship the Devī as Ātmā with the articles prescribed. The Yantra which is one's own body should be considered the best of all Yantras.' Again 'He who meditates on the Nirguṇa, unattached pure Atmā of Tripurā as not being different from his own Ātmā becomes one with Her.'

'*Thee*' (*Tvāṁ*)

That is, Brahmamayī.

'*Smiling face*' (*Smera-vadanāṁ*)

Because She is ever blissful, being Bliss itself.

'*On the breast*' (*Mahākālenoccāih*)

On the breast of S'iva who is inactive like a corpse. She divides Herself into two parts like a grain of gram, namely, S'iva and S'akti by means of Māyā associated with Iccā, Kriyā, Jñāna, whilst at the same time remaining established in Her Nirguṇa-Brahman state.

'*Fifteen-cornered seat*' (*Tripancāre pithe*)

This is the Sādhaka's own body conceived as the Yantra in which Avidyā is the encompassing circle, the eight-fold Prakṛti consisting of Earth and so forth is the eight-petalled lotus, the five Jñānendriya, the five Karmendriyā, and five Prāṇa are the five Triangles and the Bindu which is Consciousness reflected in Māyā composed of pure Sattvaguṇa is the adorning Bīja. The Gandharva-Tantra says, 'The Cakramantramaya is the Devatā's Supreme Body which is S'iva-s'akti.' The Bhagavadgītā says, 'Earth, Water, Fire, Air, Ether, Manas, Buddhi, Ahaṁkāra, these Tattvas constitute my eightfold Prakṛti.' Gandharva-Tantra says, 'The subtle body composed of uncompounded (Apañcīkṛta) Bhūta and equipped with five Prāṇas, Manas, Buddhi and ten Indriya is the vehicle for Enjoyment. Unbeginning and undefinable (Anirvācyā) Avidyā is the causal Upādhi. Know Ātmā to be different from the three-fold Upādhi.'

'*Deeply enlisted*' (*Madanarasalāvaṇyaniratāṁ*)

Always united in the reverse (Viparīta) way with Paramas'iva the Saguṇabrahman. The Gandharva-Tantra says, 'When that Supreme S'akti by putting that Puruṣa down, of Her will appears as the universe then She becomes passionate. And then becoming Herself active the Devī rises upon Bhairava and enhances Her own bliss with waves of natural pleasure.'

'*Himself also enjoying*' (*Svayam api ratānandaniratah*)

Enjoying the bliss of union in Laya with Paramātmā by Yonimudrā and becoming S'aktimaya himself. The Gheraṇḍa-Saṁhitā says, 'He should do Yoni-mudrā and himself become S'aktimaya.

He should move in Paramātmā with the good S'ṛṅgārarasa. Becoming Ānandamaya he should be one with Brahman.'

*' Destroyer of Kāma '* (*Smarahara*)

The Advaita-sādhaka attains Kaivalya by being merged in Thee who art Paramātmā.

## NOTES

[1] *Svayam api ratānandaniratah*, of which the meaning is as follows: *yadā sādhakah s'aktyā saha maithunakriyāsakto bhavati, tadā sa s'lokokta-dhyāna-prakārānusāreṇa devīṁ dhyāyati.*

[2] *Samāsaktah*, concentrated on Thee.

[3] Kālikalpalatā says it is a kind of *yantra* (diagram).

*Tripañcāre pīthe.* The *Yantra.* The *Kālī-Tantra* says, 'First draw a triangle. Outside it put another. Next draw three triangles. In the centre draw the *Baindava-Cakra* adorned with the *Māyā Bīja.* Draw a circle outside the six-cornered figure. Next draw the eight petals attached to the outer circle and *Bhūpura.* He who knows this great *Yantra* surely attains liberation.' *Bhūpura* is the gross body composed of the five *Bhūtas* (V). It is made with five triangles superimposed.

[4] *Mahākalenoccair-madana-rasa-lāvaṇya-niratāṁ.* *Mahākāla* is *Paramas'iva* (V). *Madana-rasa-lāvaṇya-niratāṁ* refers to *Viparīta-rati* (V).

[5] *Smarahara.* The destroyer of *Kāma* is *S'iva* Himself (V).

That is, he becomes *S'iva* Himself, who destroyed *Smara* the *Deva* of Love (Kāma), with Fire from His central eye, when the latter, by the excitation of desire (towards Pārvatī), sought to detract him from his *yoga.* Or it may be translated 'excels in beauty the God of Love.'

## VERSE 19

O DARK One,[1] wondrous and excelling in every way,[2] becomes the accomplishment,[3] of those worshippers[4] who living in this world[5] freely make offering to Thee in worship[6] of the greatly[7] satisfying flesh, together with hair and bone,[8] of cats, camels, sheep,[9] buffaloes, goats, and men.[10]

### COMMENTARY

'*Oh Black one*' (*Asītā*)

Asitā means free from bondage. Sitā means bound. Asitā is therefore 'not bound' or eternally liberated. The root *So*, means 'to bind.' Amarakos'a gives the meaning of Sita as 'bound.'

'*Wondrous*' (*Apūrvā*)

Best.

'*At every step*' (*Pratipadam*)

In succession, step by step.

'*All Powers*' (*Sarvasiddhi*)

The five Siddhis which are the five forms of Liberation. The S'ivagītā says, 'Sālokya, Sārūpya, Sārṣti, Sāyujya and Kaivalya. Know these to be the five forms of liberation.'

'*The flesh of*' (*Palalaṁ*)

These animals represent the Six Enemies (Ripu) or Vices which are specially characteristic of the following animals: The goat stands for Lust (Kāma) 'as lustful as a goat (Chhāga),' the buffalo, Anger (Krodha) 'as angry as a buffalo (Mahiṣa),' the cat, Greed (Lobha) 'as greedy as a cat' (Mārjāra), the sheep, Delusion (Moha), 'as stupid as a sheep' (Meṣa) the camel, Envy (Mātsarya) 'as envious as a camel' (Uṣtra), Man, Pride (Mada) 'the Pride and arrogance of man' (Nara).

The Ānandākalpa says, 'Worship should be done by making offering of lust as goat, buffalo, and so forth'. Offering is made to Thee who art Cidrūpā of lust and other vices as articles of offering (Upacāra) in worship with the object of ridding oneself of them. Bṛhannīla-Tantra says, 'In the fire of Ātmā which flames with the ghee (Havih) of Dharma and Adharma, I ever offer in Homa by the Suṣumnā path, with the mind as ladle, all the functions of the senses—Svāhā.'

'*In worship*' (*Pūjāyām*)

In mental worship according to the manner prescribed.

'*With hair and bone*' (*Loma, asthi*)

That is the whole without omitting any part. Such Sādhakas attain the Sālokya and other forms of liberation.

NOTES

[1] *Asitā*: That is Kālikā *v. post.*

[2] *Pratipadam.* The S'yāmarahasya-sārasaṁgraha reads *pratidinam* (every day) (K.B.), which seems preferable, for, as K.B. says, the worship (*pūjā*) is the general daily *pūjā*, upon which daily advancement in *siddhi* would follow.

[3] *Siddhi*: success in work; accomplishment of all which is desired (V).

[4] *Sat*, that is, *sādhu* (wise, good, pious). *Satāṁ=Sādhakānām* (V).

[5] That is, among men.

[6] *Pūjāyāṁ api* (see note 2), *ante.*

*Pūjāyāṁ*: *Naimittika* or occasional worship (V). The force of the particle *api* is that the offering is not confined to special *Sādhanā* but is made in ordinary worship also. (K.B.)

[7] *Param* (K.B.).

[8] That is flesh and all.

[9] *Maiṣaṁ.* The S'yāmarahasya-sārasaṁgraha gives also *mauṣam*, of rat's flesh. The Fetkāriṇī-Tantra has both sheep and rat's flesh (K.B.).

*Syāmārahasya* says, 'To him who makes offering of the flesh of cats, sheep, camels, and buffaloes together with bone, hair and skin *Dākṣiṇā* is ever beneficial like a Mother.'

[10] As to this human sacrifice, K. B. says that Kings alone, and not any other, are entitled to make human sacrifice, citing the Yāmala quoted in the Kālīkalpalatā (*Rājā naravaliṁ dadyān nānyopi parames'vari*). For inner sense see Svarūpa-vyākhyā *post.*

## VERSE 20

O MOTHER, he who, being a controller of his passions,[1] eats *haviṣyānnaṁ,*[2] and, being proficient in meditation on Thy feet, rightly recites [3] Thy *mantra* a hundred thousand times by day, and he who afterwards [4] naked at night, when united with his *S'akti,*[5] rightly recites Thy great *mantra* another such hundred thousand times, becomes on earth like unto the Destroyer of Smara.[6]

### COMMENTARY

*'Naked' (Nagnah)*

That is free from the covering of Māyā; Nirvikāra.

*'Amorous play' (Nidhuvana-vinodena)*

That is enjoying the bliss of union between Ātmā and Paras'akti. The Kulārṇava-Tantra says, 'That is coition (Maithuna) in which there is the bliss arising from the union of Ātmā and Paras'akti. Others are but Enjoyers of women.'

*'Becomes' (Syāt)*

That is, becomes liberated whilst yet living (Jīvanmukta) like S'iva.

### NOTES

[1] *Vashī.* The first part of this *S'loka* refers to *Pas'vācāra.*

[2] That is, one who has undertaken the *Puras'caraṇavrata,* and eats the pure form of food known as *Haviṣyānnaṁ* (K.B.).

*Haviṣyās'anaratah*: that is after the recitation (V).

[3] Makes *japa* (see *ibid.*).

[4] *Paraṁ*: that is, when he has been *Abhiṣikta* into *Vīrācāra.*

[8] *Naktaṁ nagno nidhuvana-vinodena*, the meaning of which is *yādā sādhakah s'aktyā saha maithuna-kriyāsakto bhavati, tadā sa mantraṁ japati.*

[9] *Smarahara* or *S'iva* (see note 5 to *S'loka* 18, *ante*). The Tantra-kalpadruma says, 'He who eats *Haviṣyānnaṁ*, who keeping *Devī* in mind recites the *Mantra* a hundred thousand times by day and is at night united with his *S'akti* becomes the Lord of the earth.' (V).

## VERSE 21

O MOTHER, this Hymn of Thine is the source from whence originates Thy *mantra*.[1] It sings of Thy real self, and contains injunctions for the worship of Thy two lotus Feet. He who reads it at midnight or at time of worship[2] even his random talk[3] becomes the nectar juice of poesy.

### COMMENTARY

*'Thy real self' (Svarūpākhyaṁ)*

Speaks of the Dhyāna of both Thy gross and subtle aspects.

*'Reads' (Paṭati)*

That is recites aloud. The Viśuddheśvara-Tantra says, 'Oh Devī, the reading of a Hymn (Stotra) mentally, or the recitation of a Mantra loudly is as ineffectual as water in a broken jar.'

*'Nectar of Poesy' (Prasarati kavitvāmṛtarasaḥ)*

He becomes full of the sweetness of Poesy. The Kālīkula-sarvasva says, 'All whose difficulties and dangers are destroyed by a single reading, as it were flies in a flame. His speech flows like the Ganges full of prose and poetry.'

### NOTES

[1] *Manusamuddharaṇajanuḥ*—that is, cause of *mantroddhāra*: formation of Mantra of Devī. The *mantra* is made known, and then impressed with the life and consciousness (*caitanya*) of the *sādhaka* (*mantra-caitanya*).

[2] *Pūjā*.

[3] That is, even his meaningless delirious talk, as in fever or madness, etc. (K.B.).

## VERSE 22

NUMBERS of women with large eyes, like those of the antelope,[1] impatient for his love, ever follow him. Even the King becomes subject to his control. He becomes like unto Kuvera[2] himself. An enemy fears him as if he were a prison. Living in continuous bliss[3] the devotee is liberated when yet living, and is never again reborn.[4]

Here ends the Hymn by S'rī Mahākāla, entitled ***Karpūrādistotra.***

### COMMENTARY

'*Liberated*' (*Jīvanmukta*)

And on death gets Videhamukti.

'*No rebirth*' (*Muktah pratijanuh*)

He gets Nirvāṇa in Brahman. The Mahākāla-saṁhitā says, 'Whoever constantly and with devotion reads this Hymn originating from Mahākāla, is free from danger, disease and death and in the end attains Kaivalya liberation.'

*Here ends the Hymn named Svarūpastotra of S'rīmatī Dakṣiṇa-Kālikā by S'rīmān Mahākāla.*

*Here also ends its annotation and Svarūpavyākhyā entitled Vimalānaṇdadāyinī.*

### NOTES

[1] ***Kuraṅga,*** which has beautiful large eyes.

[2] Lord of wealth.

[3] *Kelikalayā*, by the various entertaining acts (*parihāsādinā*) of which there are sixty-four. The meaning here is that there is continuous bliss.

[4] *Kelikalayā ciraṁ jivanmuktah sa bhavati ca bhaktah pratijanuh*, The translation in the text reads *pratijanuh* to mean as K. B. says, *Janmanivritti* or cessation of birth. But *Pratijanuh* may also mean 'birth after birth.' According to this translation *jivanmukta* would not refer to the state immediately preceding *Kaivalya* but, as K.B. says, *Jivadavasthānubhūtadevatā-sākṣātkāra-mukha* in which case the translation will be, He living in continuous bliss obtains direct Experience of the *Devatā* and is reborn life after life as Her devotee. According to the translation adopted complete liberation follows and in the other case some lower though happy state.

---

## OBEISANCE

To Kālī the spouse of Kāla, who destroys all sin and is Kāla.[1] She who is Tārā the Saviour the Supreme Brahmavidyā who is adored by the Lotus-born Deva.[2]

She who is S'rīvidyā, desirous of the welfare of Sādhakas, on the path of Liberation, to whom Hari and Hara[3] make obeisance.

May that Devī the Mother, who appears in the form of all things, bring forth benefits for all such as sing Her praises.

## COLOPHON

Of this King of Hymns wherein Mahākāla has described the true self of Kālikā, the Karpūrādya Hymn, untainted by worldly desire, which gives bliss to Devotees, the aforesaid Annotation containing its simple interpretation, as well as the Svarūpavyākhyā (Commentary) which gives pure joy was prepared by me Vimalānanda Svāmī for the enlightenment of Sādhakas in the Saka year 1837. Mayest Thou reside in the throat of him who reads it.

OṀ, TAT SAT, OṀ

---

[1] The first Kāla is Mahākāla and the second is the produced Kāla.
[2] Brahmā. [3] Viṣṇu and Rudra.

ॐ

श्रीगुरवे नमः । ॐ नमः परमदेवतायै ॥

# श्रीकर्पूरादिस्तोत्रम्

कर्पूरं मध्यमान्त्यस्वरपरिरहितं सेन्दुवामाक्षियुक्तं
बीजं ते मातरेतत्त्रिपुरहरवधु त्रिःकृतं ये जपन्ति ।
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः
स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥ १ ॥

टीका

ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे[1] ॥
प्रणमामि महादेवीं तुरीयां ब्रह्मरूपिणीम् ।
यस्याः स्मरणमात्रेण भवाब्धौ न निमज्जति[2] ॥
कालीं कालहरां देवीं क्रींकारबीजरूपिणीम् ।
कामरूपां कलातीतां कालिकां दक्षिणां भजे[3] ॥

कर्पूरमिति । कर्पूरमित्यादिपञ्चभिः श्लोकैः महादेव्याः सूक्ष्मरूपात्मक-विद्याराज्ञीनामद्वाविंशत्यक्षरं मन्त्रमुद्धृतम्; तथा तस्याः साधनप्रकारं माहात्म्यं च क्रमेणोक्तम् । षष्ठश्लोके तस्याः विविधमन्त्रोद्धारश्च कथितः । उक्तं च कालिका-

[1] श्रीचण्डी. [2] गन्धर्वतन्त्रम्. [3] कालीहृदयम्.

श्रुतौ; "अथ हैनां ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति। सुभगां त्रिगुणामुक्त्वा, सुभगा बिन्दुमेलनरूपा। कामरेफेन्दिरा तु समष्टिरूपिणी। एतत्त्रिगुणितमादौ। तदनु कूर्चद्वयं, कूर्चबीजं तु व्योमषष्ठस्वरबिन्दुमेलनरूपम्। तदेव द्विरुच्चार्य तदनु भुवनाद्वयं, भुवना तु व्योमज्वलनेन्दिराशून्यमेलनरूपा। तदेव द्विरुच्चार्य दक्षिणे कालिके चेत्यभिमुखंगता, तदनु, बीजसप्तकमुच्चार्य बृहद्भानुजायामुच्चरेत्। अयं सर्वमन्त्रोत्तमोत्तमः" इति। तथा च **निरुत्तरतन्त्रे**—

"अथ वक्ष्ये महेशानि दक्षिणाकालिकामनुम्।  
येन विज्ञानमात्रेण जीवन्मुक्तः प्रजायते॥  
ब्रह्मानलयुतं देवि नादबिन्दुसमन्वितम्।  
वामनेत्रेण संयुक्तं चित्स्वरूपं परात्परम्॥  
एकाक्षरी सिद्धविद्या मन्त्रराज्ञी कुलेश्वरि।  
त्रिगुणा च कूर्चयुग्मं लज्जायुग्मं ततः परम्॥  
दक्षिणे कालिके चेति सप्तबीजानि योजयेत्।  
अन्ते वह्निवधूं दद्यात् विद्याराज्ञी प्रकीर्तिता।  
सर्वमन्त्रमयी विद्या सृष्टिस्थित्यन्तकारिणी॥"

इति। अपरं च प्रथमश्लोके श्रीमत्कालिकायाः एकाक्षरी मन्त्रराज्ञी क्रीँबीजमुद्धृतम्। द्वितीयश्लोके श्रीमत्ताराया एकाक्षरमन्त्रं हूंबीजमुद्धृतम्। तृतीयश्लोके श्रीमत्त्रिपुरसुन्दर्या एकाक्षरमन्त्रं ह्रींबीजमुद्धृतं च। तथा कालीतारासुन्दरीणां रहस्यसाधनप्रकरणं च वर्णितम्। तेन एतत्स्वरूपाख्यस्तोत्रं ककारकूटस्तोत्रवत् त्रिशक्तिविषये पाठ्यमिति क्रमदीक्षितसाधकेन्द्राणामभिमतम्। उक्तं च **तारारहस्यतन्त्रे**—

"यथा काली तथा तारा तथा नीलसरस्वती।  
सर्वाभीष्टफलं दद्यात् तथा त्रिपुरसुन्दरी॥  
अभेदमतमास्थाय यः कश्चित् साधयेन्नरः।  
त्रिलोके स तु पूज्यः स्यात्ताराया: सुत एव सः॥

मेदं कृत्वा यदा मन्त्री साधयेदत्र साधनम् ।
न तस्य निष्कृतिर्देवि निरये पच्यते हि सः ॥"

इति । उक्तं च ताराध्याने कवचे च; "हूंकारबीजोद्भवा" "हूँ तारा मे सदा पातु बीजैकाक्षररूपिणी" इति । तथा श्रीसुन्दर्याः क्रमस्तोत्रे च—

"ह्रींकारमेव तव नाम गृणन्ति वेदा
मातस्त्रिकोणनिलये त्रिपुरे त्रिणेत्रे ।
ह्रीं ह्रीमिति प्रतिदिनं जपतां तवाख्यां
किं नाम दुर्लभमिह त्रिपुराभिधाने ॥"

इति । तथा च महाकालसंहितायाम्; "श्रीविद्या कालिका तारा त्रिशक्तिविषये पठेत्" इति । वस्तुतस्तु यद्वद्भिन्नजातीयबीजेभ्य एकविधा लता कदापि नोत्पद्यते, तद्वत् क्रींकारहूंकारह्रींकारादिभ्यो विभिन्नबीजमन्त्रेभ्य एकरूपा मूर्तिर्न संभवति । अतः पूर्वोक्तैस्त्रिभिर्बीजैः ब्रह्मविद्या श्रीमद्दक्षिणकालिकैव सर्वरूपिणीति सूचिता ।

हे मातः! ध्वान्तधाराधररुचिरुचिरे! नीलमेघकान्तिरिव मनोज्ञे! नवीनजलधरो यथा अमृतवारिवर्षणेन आतपतप्तपृथ्वीं शीतलां करोति, तद्वत्त्वमपि कृपामृतवर्षणेन त्रितापतप्तसाधकाय अमृतत्वं ददासीति भावः । त्रिपुरहरवधु ! स्वर्गमर्त्यपातालस्थैः त्रिपुरैः सह त्रिपुराख्यासुरनाशकमहेशशक्ते ! कर्पूरं मध्यमान्त्यस्वरपरिरहितम्; कर्पूरशब्दस्य मध्यमो रेफयुक्तः पकारः, अन्त्य अनुस्वारः, स्वराः अकारोकारान्तिमरेफस्थाकाराः, तैः सर्वतोभावेन वर्जितं, तेन "क्र" इति स्थितम् । सेन्दुवामाक्षियुक्तम्; सेन्दु, बिन्दुयुक्तार्धचन्द्रेण सह वर्तमानं, वामाक्षियुक्तं ईकारेण युक्तम्, तथा च "क्रीँ" इति । ते तव बीजं मन्त्रात्मकशरीरस्य कारणम् । त्रिःकृतम्; त्रिगुणीकृतं, ये ; जनाः जपन्ति, मन्त्रार्थगतमानसाः सन्तः मनसा उच्चारयन्ति । सर्वसिद्धिं गतानाम्; शिवस्य अणिमाद्यष्टसिद्धिं प्राप्तानां साधकानाम्; मुखकुहरात्; आस्यविवरात् । गद्यानि पद्यानि च वाचः गद्यपद्यमयानि वाक्यानि स्वच्छन्दम् अप्रयत्नसुलभम् उल्लसन्ति प्रस्फुरन्तीत्यर्थः । अपि च श्रूयते—'यत् श्रीमत्कालि-

काया इदं "क्रीँ" बीजम्, इसलामधर्मावलम्बिनः साधकाः मोक्षलाभकामनया आरबीयभाषया रूपान्तरितं "करीम्" इति मन्त्रं जपन्ति, तथा खृष्टानधर्मावलम्बिनः साधका अपि "क्राइष्ट" इति मन्त्रं मुक्तिकामनया सदैव जपन्ति' इति ॥ १ ॥

## स्वरूपव्याख्या

नत्वा श्रीपादुकां भक्त्या रामानन्दस्य योगिनः ।
कृता स्वरूपव्याख्येयं विमलानन्ददायिनी ॥

कर्पूरमिति । हे मातः! (माति परिमितं ददातीति माता—मा+तृच) सकामनिष्काम-भेदेन भोगमोक्षदात्रि! ध्वान्तधाराधररुचिरुचिरे;[1] शुद्धसत्त्वगुणात्मकघनीभूततेजोमयत्वात् तथा चिदाकाशत्वाच्च नीलवर्णचिन्तनीये! त्रिपुरहरवधु![2] स्थूल-सूक्ष्म-कारणदेहान् हरतीति विदेहमुक्तिदायकत्रिपुरहरः, तस्य विदेहमुक्तिदातुर्या शक्तिः सा त्वमेव, विदेह-कैवल्यदात्रीति भावः । मध्यमान्त्यस्वरपरिरहितं;[3] सत्त्वरजस्तमोगुणात्मिकाया मूलप्रकृतेः मध्यम उकारात्मको रजोगुणः, अन्त्यं, मकारात्मकस्तमोगुणः, ताभ्यां रहितं शुद्धसत्त्व-गुणात्मकम् । सेन्दुवामाक्षियुक्तम्[4]; निर्वाणमोक्षदायिनी शक्तिः, तथा साधकाभीष्टदायिका

[1] शिवयोर्व्योमरूपत्वादसिते लक्ष्यते वपुः । योगवासिष्ठम् । (शिवा च शिवश्च शिवौ, तयोः)
मोक्षे साक्षादपेताम्बुदगगननिभां भावयेद्भक्तिगम्याम् ॥ त्रिपुरासारसमुच्चयः ॥

[2] पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रम् ।
आधारमानन्दमखण्डबोधं यस्मिँल्लयं याति पुरत्रयं च ॥ कैवल्योपनिषत् ॥

[3] अकारः सात्त्विको ज्ञेय उकारो राजसः स्मृतः ।
मकारस्तामसः प्रोक्तस्त्रिभिः प्रकृतिरुच्यते ॥ ज्ञानसंकलिनी ॥
स्वरेण संधयेत् योगमस्वरं भावयेत् परम् ॥ ब्रह्मबिन्दूपनिषत् ॥

[4] ककारोज्ज्वलरूपत्वात् केवलं ज्ञानचित्कला ।
ज्वलनार्णसमायोगात् सर्वतेजोमयी शुभा ।
दीर्घेकारेण देवेशि साधकाभीष्टदायिनी ।
बिन्दूनां निष्कलत्वाच्च कैवल्यफलदायिनी ॥ तन्त्रकल्पद्रुमः ॥

तोडलतन्त्रे च—

ककारं धर्मदं देवि ईकारं चार्थदायकम् ।
रकारं कामदं कान्ते मकारं मोक्षदायकम् ।
एकत्रोच्चारणाद्देवि मोक्षनिर्वाणदायिनी ॥ इति ॥

शुद्धसत्त्वप्रधाना मायाशक्तिः ताभ्यां युक्तम्। कर्पूरं कल्पयति जगत् प्रपञ्चं यत्, तत् सगुणब्रह्म इत्यर्थः। ते तव बीजं[1] जगत्कारणभावं सच्चिदानन्दरूपिणी त्वं निर्गुणापि जीवकर्मकालविशिष्टया मायया युक्ता सती तत्तज्जीवतत्तत्कर्मफलभोगसमये प्राप्ते जगत्सर्जने बीजात्मतां गतासीति भावः। एतत् क्रीं वाच्यं तव शुद्धसत्त्वात्मकं सच्चिदानन्दरूपं, ये साधकाः त्रिःकृतं त्रिगुणीकृतं, सात्त्विकराजसिकतामसिकभेदेन, तथा स्थूल-सूक्ष्म-कारणभेदेन त्रिविधं त्रिशक्तिरूपं च; जपन्ति[2]; स्वात्माभेदेन चिन्तयन्ति, ते अनिच्छन्तोऽपि धर्मार्थकाममोक्षरूपचतुर्वर्गं लभन्त इति भावः। उक्तं च **विश्वसारतन्त्रे** दक्षिणकालिकायाः क्रमस्तोत्रे—

"त्वदीयबीजत्रयमेतदम्ब जपन्ति सिद्धास्तु विमुक्तिहेतोः।
तदेव मातस्तव पादपद्मगा भवन्ति सिद्धाश्च दिनत्रयेऽपि ॥"

इति ॥ १ ॥

**ईशानः सेन्दुवामश्रवणपरिगतो बीजमन्यन्महेशि**
**द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित्।**
**जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नम्बुजाक्षी-**
**वृन्दं चन्द्रार्धचूडे प्रभवति स महाघोरबालावतंसे ॥ २ ॥**

## टीका

ईशान इति। हे महेशि! ब्रह्मविष्णुरुद्राणामपि ईशः महेशस्तस्य शक्ते! हे चन्द्रार्धचूडे! चन्द्रार्धाङ्कितमस्तके! हे महाघोरबालावतंसे! अतिभयानकशवबालकृतकर्णालंकारे। मन्दचेताः जनः; मूढबुद्धिर्जनः। ते; तव। सेन्दुवामश्रवणपरिगतः; चन्द्रबिन्दुसहितो यो दीर्घ ऊकारस्तेन युक्तः। ईशानः; हकारः। एतेन "हूँ" इति तव द्वितीयमूर्तेस्तारायाः एकाक्षरबीजमन्त्रं चोद्धृतम्।

---

[1] तादात्म्यरूपं चित्संवित् परब्रह्मैकनामकम्।
स्वशक्तेश्च समायोगादहं बीजात्मतां गता ॥
अव्यक्तं कारणो देहः स चोक्तं पूर्वमेव हि।
यस्मिन् जगद्बीजरूपं स्थितं लिङ्गोद्भवो यतः ॥ देवीगीता ॥

[2] सदा कालीरूपमात्मानं विभावयेत् ॥ कालयुपनिषद् ॥

द्वन्द्वम्; एतत् युग्मं कृत्वा। यदि; कदाचित् एकवारमपि जपति। तदा, सः; चिरम्; यावज्जीवम्। वाचामधीशम्; बृहस्पतिम्; धनदमपि; कुबेरं च। जित्वा; पराभूय, अम्बुजाक्षीवृन्दम्; सुन्दरीसमूहं मोहयन् प्रभवति, मोहयितुं समर्थो भवति। स साधकः अतीव विद्वान् धनवान् रूपवांश्च भवतीत्यर्थः। तथा च ताराराहस्ये—"तारकत्वात् सदा तारा या काली सैव निश्चिता" इति। क्रमस्तोत्रे च—

त्वदीयकूर्चद्वयजापकत्वात् सुरासुरेभ्योऽपि भवेच्च पूज्यः।
प्रज्ञाश्रियौ चापि लभन्ति सर्वे किं वापरं देवि परापराख्ये॥

इति॥ २॥

### स्वरूपव्याख्या

ईशान इति। हे महेशि! सृष्टि-स्थिति-विनाशात्मकमहैश्वर्यवति! चन्द्रार्धचूडे![1] निर्वाणमोक्षदायिनि। हे महाघोरबालावतंसे![2] महेश्वरसदृशनिर्विकारबालकवन्निष्काम-साधकाभ्यां कृते अतिप्रिये कर्णभूषणे यया तत् संबोधने। बालकवन्निर्विकारतत्त्वं साधकः ब्रह्मरूपिण्या अतीव प्रिय इत्यर्थः। सेन्दुवामश्रवणपरिगतः[3]; इन्दुः अमृतत्वं वाग्दातृत्वं रूपाकर्षिणीत्वं च तैर्युक्तः। ईशानः[4]; ईश्वरः, इति ते अन्यद्बीजं[5] हूंबीजात्मककारण-भावम्। द्वन्द्वं[6] शिवशक्त्यात्मकं स्वरूपम्। यदि कदाचित् एकवारमपि जपति, मानस-

---

[1] नित्यायाः कालरूपाया अरूपायाः शिवात्मनः।
अमृतत्वाल्ललाटेऽस्याः शशिचिह्नं निरूपितम्॥ महानिर्वाणतन्त्रम्॥

[2] क्षुधां देहव्यथां त्यक्त्वा बालः क्रीडति वस्तुनि।
तथैव विद्वान् रमते निर्ममो निरहंसुखी॥ विवेकचूडामणिः॥
तथा च ब्रह्मोपनिषदि—
यथा कुमारो निष्काम आनन्दमुपयाति॥ इति॥

[3] ऊकारो भैरवः सूक्ष्मो दीर्घघोणा सरस्वती।
विलासिनी विघ्नकर्ता लक्ष्मणो रूपकर्षिणी॥

[4] अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।
ईशानो भूतभव्यस्य स एवाद्य स उ श्वः॥ कठोपनिषत्॥

[5] शब्दबीजद्वयेनैव शब्दराशिप्रबोधिनी। यामलम्।

[6] शिवशक्तिसमायोगाज्जनितो मन्त्रराजकः।
तन्मयीं परमानन्दनन्दितां मन्त्ररूपिणीम्॥ गन्धर्वतन्त्रम्॥

जपेन चिन्तयति । तर्हि स साधकः ज्ञानविज्ञानवान् धनवांश्च भूत्वा, सर्वं जगत् मोहयितुं शक्नोतीति भावः ॥ २ ॥

**ईशो वैश्वानरस्थः शशधरविलसद् वामनेत्रेण युक्तो**
**बीजं ते द्वन्द्वमन्यद् विगलितचिकुरे कालिके ये जपन्ति ।**
**द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति**
**सृक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षिणे त्र्यक्षरेति ॥ ३ ॥**

## टीका

ईश इति । हे विगलितचिकुरे ! मुक्तकेशि ! हे कालिके ! ब्रह्मरूपिणि ! हे सृक्कद्वन्द्वास्रधाराद्वयधरवदने ! ओष्ठप्रान्तद्वयगलितरुधिरधाराशोभितानने ! वैश्वानरस्थः; रकारयुक्तः । शशधरविलसत्; चन्द्रविन्दुयुक्तः । वामनेत्रेण युक्तः; ईकारेण युक्तः । ईशः; हकारः । अन्यत् "ह्रीं" इति त्रिपुरसुन्दरीबीजम् । द्वन्द्वम्; उक्तबीजं द्विगुणीकृतम् । तथा "दक्षिणे" इति नामात्मकत्र्यक्षरमन्त्रं च ये जनाः जपन्ति । ते द्वेष्टारं; शत्रुं घ्नन्ति नाशयन्ति । त्रिभुवनमपि; स्वर्ग-मर्त्य-पातालस्थं देवनरनागादिकं च वश्यभावं नयन्ति, अधीनत्वं प्रापयन्तीत्यर्थः ॥ ३ ॥

## स्वरूपव्याख्या

ईश इति । हे विगलितचिकुरे ! केशविन्यासादिविलासविकाररहिते ! निर्विकारे ! कालिके ! क[1] ब्रह्म, आ[2] अनन्तः, ल[3] विश्वात्मा, इ[4] सूक्ष्मा, क ब्रह्म, आ अनन्त इति कालिका, एतेन महादेव्या आद्यन्तरहितत्वं अनन्तत्वं सूक्ष्मत्वं विश्वात्मकत्वं च सूचितम् । हे अनाद्यन्तब्रह्मरूपिणीत्यर्थः । उक्तं च अद्भुतरामायणे श्रीरामकृतासितास्तोत्रे—

[1] कः क्रोधीशो महाकाली कामदेवः प्रकाशकः ।
श्रीपुरं रमणोऽनङ्गकुसुमा परमात्मकः ॥

[2] आकारो विजयानन्तौ ।

[3] लश्चन्द्रः पूतना पृथ्वी माधवः शक्रवाचकः ।
विश्वात्ममन्दौ बलवान् मेरुर्गिरिः कलारसः ।

[4] इः सूक्ष्मा शाल्मली विद्या चन्द्रः पूषा गुप्तांशकः ॥ तन्त्राभिधानम् ॥

"आद्यन्तहीनं जगदात्मरूपं विभिन्नसंस्थं प्रकृतेः परस्तात् ।
कूटस्थमव्यक्तवपुस्तवैव नमामि रूपं पुरुषाभिधानम् ॥"

इति । हे सृक्कद्वन्द्वास्रधाराद्वयधरवदने ! सृक्कद्वयगलद्रक्तधाराविस्फुरिताननने ! अत्र रक्तधारया रजोगुणः सूचितः, तस्मात् महादेवी रजोरहिता शुद्धसत्वात्मिका विरजेति[1] निरूपिता । त्रिपुरसुन्दरीपक्षे तु, रजोगुणेन महादेव्या रक्तवर्णा मूर्तिः सूचिता । वैश्वानरस्थः; तेजोमयः । शशधरविलसद्; अमृतदातृशक्त्या सह । वामनेत्रेण युक्तः; शुद्धसत्वगुणात्मिकया मायया युक्तः । ईशः; ईश्वरात्मकसूक्ष्मबीजात्मभाव इति । ते; तव अन्यत् अपरम् । द्वन्द्वम्; [2]ह्लेखावाच्यशिवशक्त्यात्मकं बीजात्मरूपम् । तथा "दक्षिणे"[3] इति संबोधननामात्मकत्र्यक्षरं मन्त्रवाच्यं कैवल्यदायकसच्चिदानन्दरूपं ये साधकाः जपन्ति ध्यायन्ति । ते द्वेष्टारं साधनविघ्नकरकामक्रोधादिकं घ्नन्ति नाशयन्ति । त्रिभुवनमपि; त्रिलोकीं च वश्यभावं नयन्ति; वश्यतां प्रापयन्ति । श्रीसुन्दरीपक्षे तु—हे कालिके! रक्तकालिके! तृतीयमहाविद्या श्रीमत्त्रिपुरसुन्दरीत्यर्थः । उक्तं च बृहन्नीलतन्त्रे—

"इयं नारायणी काली तारा स्यात् शून्यवाहिनी ।
सुन्दरी रक्तकालीयं भैरवी नादिनी तथा ॥"

[1] हिरण्मये परे कोशे विरजं ब्रह्मनिष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥

[2] हकारः स्थूलदेहः स्याद्रकारः सूक्ष्मदेहकः ।
ईकारः कारणात्मासौ ह्रींकारोऽहं तुरीयकः ॥ देवीगीता ॥

[3] दक्षिणस्यां दिशि स्थाने संस्थितश्च रवेः सुतः ।
कालीनाम्ना पलायेत भीतियुक्तः समंततः ।
अतः सा दक्षिणा काली त्रिषु लोकेषु गीयते ॥ निर्वाणतन्त्रम् ॥

तथा च कामाख्यातन्त्रे—

यथा कर्मसमाप्तौ च दक्षिणा फलसिद्धिदा ।
तथा मुक्तिरसौ देवी सर्वेषां फलदायिनी ॥
अतो हि दक्षिणाकाली कथ्यते वरवर्णिनी ।
पुरुषो दक्षिणः प्रोक्तः वामाशक्तिर्निगद्यते ॥
वामा सा दक्षिणं जित्वा महामोक्षप्रदायिनी ।
ततः सा दक्षिणा नाम्ना त्रिषु लोकेषु गीयते ॥ इति ।

इति। तथा च तन्त्रान्तरे—

"कालिका द्विविधा प्रोक्ता कृष्णारक्ताप्रभेदतः।
कृष्णा तु दक्षिणा प्रोक्ता रक्ता तु सुन्दरी मता॥"

इति। दक्षिणे; दक्षिणामूर्तिभैरवाराधित इत्यर्थः। त्र्यक्षरे; ऐँ क्लीँ ह्रीँ मन्त्रवाच्य इत्यर्थः। तथा च क्रमस्तोत्रे—

"त्वदीयलज्जाद्वयजापकत्वाद् भवेन्महेशानि चतुर्थसिद्धिः।
दयासमुद्रस्य वरप्रसादाद् भवाधिपत्यं लभते नरेशः॥"

इति॥ ३॥

**ऊर्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः**
**सव्ये चाभीर्वरं च त्रिजगदघहरे दक्षिणे कालिके च।**
**जप्त्वैतन्नाम ये वा तव मनुविभवं भावयन्त्येतदम्ब**
**तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य॥ ४॥**

## टीका

ऊर्ध्वे इति। हे त्रिजगदघहरे! त्रिजगतां जनानां पापनाशिनि! हे प्रकटितरदने![1] प्रकाशितदशने! हे अम्ब! मातः! दक्षिणे! निर्वाणदात्रि! ये साधकाः। तव मनुविभवम्; पूर्वोक्तं कालीबीजत्रयं कूर्चद्वयं[2] मायाद्वयं "दक्षिणे" इति त्र्यक्षररूपं दशाक्षरमन्त्रसंपत्तिं तथा "कालिके" इति नामात्मकत्र्यक्षरमन्त्रं जप्त्वा, वामे ऊर्ध्वे करकमलतले कृपाणं खड्गं, तथा अधः; निम्ने छिन्नमुण्डं छिन्नमस्तकम्, सव्ये दक्षिणे ऊर्ध्वे करकमलतले अभीः, अभयमुद्राम्। वरं च; दक्षिणे अधः करकमलतले वरमुद्रां च। एतत् ईदृशम् ऊर्ध्वे वामे कृपाणमित्यादि-

[1] दन्तुरां परमां नित्यां रक्तमण्डितविग्रहाम्। योगिनीतन्त्रम्।
तथा च ताराकल्पे—
नवाम्भोदश्यामां प्रकटरदभीमां पृथुकुचाम्। इति।

[2] माया लज्जा च ह्रींकारः हूँकारः कूर्च उच्यते॥

प्रकाररूपं भावयन्ति चिन्तयन्ति । त्र्यम्बकस्य; शिवस्य । अष्टौ सिद्धयः;[1] अणिमाद्योऽष्टौ प्रकाराः सिद्धयः, तेषां साधकानां, करस्थाः; अनायासलब्धा भवन्तीः ॥ ४ ॥

### स्वरूपव्याख्या

ऊर्ध्वे इति । हे त्रिजगदघहरे! त्रिलोकीनां कायिकवाचिकमानसिकत्रिविधपापनाशिनि! हे प्रकटितरदने! स्वप्रकाशसत्त्वगुणसूचकशुभ्रदशनपङ्क्त्या रजोगुणसूचकरक्तवर्णा लोलरसनां दशति सत्त्वगुणेन रजस्तमश्च नाशयति या तस्याः संबोधने । हे अम्ब! मातः! दक्षिणे निर्वाणदात्रि! ते तव मनुविभवं; निजबीजत्रयात्मकचिद्घनमूर्ति, कूर्चबीजद्वयात्मकसत्त्वात्मकमूर्ति, तथा मायाबीजद्वयात्मकरजःप्रधानसत्त्वमूर्ति च । तथा कालिके, कालिके इति नामवाच्यम् आद्यन्तरहितं सच्चिदानन्दमूर्ति च जप्त्वा चिन्तयित्वा । स्त्रीमूर्तिधारिणो त्वं[2] स्वीयवामोर्ध्वहस्तेन ज्ञानखड्गेन[3] निष्कामसाधकानां मोहपाशं छित्त्वा, तदधोहस्तेन विगतरजं तत्त्वज्ञानाधारं मस्तकं दधासि, तथा दक्षिणोर्ध्वहस्तेन सकामसाधकेभ्य अभयं, तथा तदधोहस्तेन चाभीष्टवरं च दधासीति । एवंभूतां त्वां ये साधकाः ध्यायन्ति, तेषामणिमाद्यष्टसिद्धयः, अनायासलब्धा भवन्तीति भावः ॥ ४ ॥

**वर्गाद्यं वह्निसंस्थं विधुरतिललितं तत्त्रयं कूर्चयुग्मं**
**लज्जाद्वन्द्वं च पश्चात् स्मितमुखि तदधष्ठद्वयं योजयित्वा ।**
**मातर्ये ये जपन्ति स्मरहरमहिले भावयन्तः स्वरूपं**
**ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवन्ति ॥ ५ ॥**

[1] अणिमा महिमा चैव लघिमा प्राप्तिरेव च ।
प्राकाम्यं च तथेशित्वं वशित्वं च तथापरम् ॥
तथाकामावशायित्वं गुणानेताननैश्वरान् ।
प्राप्नोत्यष्टौ नरव्याघ्र परनिर्वाणसूचकान् ॥ मार्कण्डेयपुराणम् ॥

[2] स्त्रीरूपां वा स्मरेद्देवीं पुंरूपां वा स्मरेत् प्रिये ।
स्मरेद्वा निष्कलं ब्रह्म सच्चिदानन्दविग्रहम् ॥

[3] तस्मात् ज्ञानासिना तूर्णमशेषं कर्मबन्धनम् ।
कामाकामकृतं छित्वा शुद्धश्चात्मनि तिष्ठति ॥ शिवधर्मोत्तरे ॥
तथा च योगिनीतन्त्रे—
पापपुण्यपशुं हत्वा ज्ञानखड्गेन शांभवि । इति ।

## टीका

**वर्गाद्यमिति** । हे स्मितमुखि ! ईषद्धास्यवदने ! हे स्मरहरमहिले ! मदनान्तकमोहिनि ! हे मातः ! ये ये जनाः वह्निसंस्थं[1] रकारोपरिस्थितम् । विधु[2]रतिललितं, विधुश्चन्द्रबिन्दुः, रतिः, दीर्घ ईकारः, ताभ्यां युक्तम् । वर्गाद्यं ; पञ्चवर्गाणामादिभूतं "क" इति वर्णं, "क्रीँ" इति बीजं, तत्त्रयं ; तस्य त्रितयम् । पश्चात् ; तदनन्तरं कूर्चयुग्मं हूँ बीजद्वयम् । लज्जाद्वन्द्वं च ; ह्रीँ बीजद्वयं च, तदधः ; तत्पश्चात् ठद्वयं[3] द्विठं "स्वाहा" शब्दम्, योजयित्वा ; संयोज्य, स्वरूपं 'ध्वान्तधाराधररुचिरुचिरे' इत्यादि त्वदीयद्वाविंशत्यक्षरमन्त्रघटितं रूपम् । भावयन्तः[4] ; ध्यायन्तः, जपन्ति, "क्रीँ क्रीँ क्रीँ" इत्यादि स्वाहान्तं द्वाविंशत्यक्षरीं विद्याराज्ञीं पुनः पुनः उच्चारयन्ति । ते; साधकाः, लक्ष्मीलास्यलीलाकमलदलदृशः ; लक्ष्म्याः या नृत्यक्रीडा, सा यत्र कमले पद्मे, तद्दलमिव पत्रमिव दृशो चक्षूंषि येषां तथाविधाः । कामरूपाः ; कामदेवसदृशकमनीयरूपा भवन्ति ॥ ५ ॥

## स्वरूपव्याख्या

वर्गाद्यमिति । हे स्मितमुखि ! नित्यानन्दरूपिणि ! स्मरहरमहिले ! स्मरहरः कामनाशकः हरः, तस्य महिला शक्तिः, स्वीयसाधकानां कामक्रोधादिनाशिनीति भावः । हे मातः ! ये ये ;[5] ये केचित् साधकाः नराधमा अपि, यदि तव वह्निसंस्थं तेजोमयम् । विधुरतिललितम् ;

[1] रो रक्तः क्रोधिनी रेफः पावकस्तैजसो मतः । तन्त्राभिधानम् ।

[2] ईस्त्रिमूर्तिर्महामाया . . . . . रतिश्च पौण्ड्रवर्धनः । तन्त्राभिधानम् ।

[3] द्विठः स्वाहानलप्रिया । वर्णाभिधानम् ।

[4] क्रीँकारो मस्तकं देवि क्रीँकारश्च ललाटकम् ।
स्वाहाशब्देन पदद्वन्द्वं हाकारेण नखस्तथा ॥
इत्यादि शाक्तानन्दतरङ्गिण्या नवमपटले द्रष्टव्यम् ।

[5] महामहाब्रह्मविद्या विद्येयं कालिका मता ।
यामासाद्य च निर्वाणमुक्तिमेति नराधमः ॥

तथा च कालीकुलसर्वस्वे—

भक्त्याभक्त्या वापि यः कश्चिन्मानवः स्मरेत् ।
दुर्गं च दुर्गतिं जित्वा स याति परमां गतिम् ॥ इति ॥

शैत्यसौन्दर्ययुक्तम्। वर्गाद्यम्; सृष्टेः आदिभूतं चिन्मयरूपम्। तत्त्रयं सत्त्वरजस्तमोभेदेन त्रिविधरूपम्। पश्चात् तथा कूर्चयुग्मं; शब्दब्रह्मरूपम्। लज्जाद्वन्द्वं च; मायाशबलब्रह्मरूपं च। तदधः ठद्वयं योजयित्वा; स्वाहा वह्नेः प्रकाशशक्तिः, तया सह ते स्वप्रकाशरूपं स्वरूपं[1] स्वस्य आत्मनो रूपं, जीवात्मना सह अभेदम्। भावयन्तो जपन्ति अनुध्यायन्ति। ते साधकाः; लक्ष्मीलास्यलीला,[2] लक्ष्म्याः श्रियः, लास्यं नृत्यं, लीला क्रीडा, रमणं चेत्यर्थः। लक्ष्म्याः नृत्यादिविहार इति भावः। तस्या आधारभूतः यः कमलदृक् कमलाक्षः विष्णुः तत्सदृशाः। उक्तं च देवीमाहात्म्ये, "श्रीः कैटभारिहृदयैककृताधिवासा" इति। कामरूपाः; स्वेच्छानुसारेण शरीरग्रहणसमर्था भवन्ति। यथा पुण्डरीकाक्षः विष्णुः स्वेच्छया मत्स्य-कूर्म-वराहादिदशविधमूर्तीन् तथा मोहिनीमूर्तिं च दधार, तद्वत् कालीसाधकाः स्वेच्छानुसारेण मूर्तिं परिग्रहीतुं शक्नुवन्तीति भावः। उक्तं च क्रमस्तोत्रे—

"ततः स्वनाम्नः शृणु मातरेतत् फलं चतुर्वर्गमुशन्ति सन्तः।
बीजत्रयं वै पुनरप्युपास्य सुराधिपत्यं लभते मुनीन्द्रः॥
पुनस्तथा कूर्चयुगं जपन्ति भवन्ति सिद्धा नरसिंहरूपाः[3]।
ततोऽपि लज्जाद्वयजापकत्वात् लभन्ति सिद्धिं मनसा जनास्ते।
अन्ते पदं क्षिप्य विभा विभावसोः तन्मन्त्रमुद्धारमिदं वदन्ति॥"

इति॥ ९॥

---

[1] सर्वदा कालीरूपमात्मानं विभावयेत्। कालिकोपनिषत्।
तथा च सहस्रनामस्तोत्रे—
आत्मानं कालिकात्मानं भावयन् स्तौति यः शिवाम्।
शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः॥ इति॥
तथा च योगिनीतन्त्रे—
क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिन्तनम्।
तस्मै दद्यात् फलं देवी तस्यान्तं नैव गण्यते॥
आत्मदेहं स्वेष्टरूपं सदैव परिचिन्तयेत्।
ब्रह्माण्डं च तथा सर्वं स्वेष्टरूपं विचिन्तयेत्॥ इति॥

[2] निर्वाणतन्त्रे—
अस्य ग्रहणमात्रेण नरो नारायणो भवेत्। इति।
भैरवतन्त्रोक्तश्यामाकवचे च—
नारायणोऽपि यद्धृत्वा नारी भूत्वा महेश्वरं। योगेशं क्षोभमनयत् •। इति।
निर्वाणतन्त्रे च—
ध्यानेन लभते सर्वं ध्यानेन विष्णुरूपकः।

[3] विष्णुरूपाः।

**प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यं**
**त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ।**
**तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे**
**वाग्देवी देवि मुण्डस्रगतिशयलसत्कण्ठि पीनस्तनाढ्ये ॥ ६॥**

### टीका

प्रत्येकमिति । हे देवि! द्योतनशीले! हे मुण्डस्रगतिशयलसत्कण्ठि! मुण्डमालिनि! हे पीनस्तनाढ्ये! पीवरस्तनि! अत्यन्तगुह्यम्; साधकेतराणां समीपे अतीव गोपनीयम् । प्रत्येकं[1] वा; पूर्वोक्तानां बीजानामेकैकम् । द्वयं वा; द्व्यक्षरं वा । त्रयमपि च; त्र्यक्षरमपि । त्वन्नाम्ना; संबोधनान्तेन दक्षिणकालिकेति नाम्ना, योजयित्वा; एकाक्षरं द्व्यक्षरं त्र्यक्षरं संपुटितं कृत्वा । सकलमपि; द्वाविंशत्यक्षरात्मकविद्याराज्ञीं वा । भावयन्तः[2]; तत्तन्मन्त्रार्थवाच्यं त्वद्ध्यानोक्तं तव नवघननील-दिगम्बरी-पीनस्तनी-मुण्डमालिनी-मुक्तकेशीरूपम् । ध्यायन्तः; पूर्वोक्तमन्त्राणां मन्त्रमेकं जपन्ति च, तेषां-साधकानां, नेत्रारविन्दे; नयनपद्मे, कमला लक्ष्मीः विहरति; सदैव तिष्ठति । तथा तेषां वक्त्रशुभ्रांशुबिम्बे; मुखचन्द्रे, वाग्देवी; सरस्वती च, विहरति विहारं करोति । ते धनवन्तो विद्यावन्तश्च भवन्तीति भावः । श्रीसुन्दरीपक्षे तु—हे देवि! त्रिपुरसुन्दरि! ये साधकाः "सकलं" इति त्र्यक्षरबीजं तव ह्रीँकार इति नाम्ना योजयित्वा, प्रत्येकं केवलं "सकलह्रीँ" इति शक्तिकूटाख्यमन्त्रम्, अथवा कामराजकूटसहितं कूटद्वयं, किं वा वाग्भवकामराजशक्त्याख्यकूटत्रयात्मकं पञ्चदशाक्षरमन्त्रराजम्, त्वां ध्यायन् जपन्ति, तेषां नेत्रारविन्दे इत्यादि सर्वं पूर्ववत् ॥ ६ ॥

### स्वरूपव्याख्या

प्रत्येकमिति । हे देवि! स्वप्रकाशरूपिणि! हे मुण्डस्रगतिशयलसत्कण्ठि! हे

[1] अथ सर्वां विद्यां प्रथममेकं द्वयं वा बीजत्रयपुटितं नाम वा जपेत् गतिस्तस्यास्ति ।
इति कालिकाश्रुतौ ।

[2] यस्य यस्य च मन्त्रस्य उद्दिष्टा या च देवता ।
चिन्तयित्वा तदाकारं मनसा जपमाचरेत् ॥ भूतशुद्धितन्त्रम् ॥

पञ्चाशद्वर्णमयि[1]! शब्दब्रह्मरूपिणि! हे पीनस्तनाढये! स्तन्यरूपाहार्यादिदानेन त्रिजगतां पालयित्रि! तथा स्तन्यामृतदानेन साधकानां मोक्षदात्रि च। मात:! तव प्रत्येकं वा द्वयं वा त्रयमपि च, परम्; अत्यन्तगुह्यं सकलं सगुणं बीजं तव प्राज्ञतैजसविश्वाख्यव्यष्टिरूपम्। तथा ईश-सूत्र-विराडाख्यसमष्टिभूतमूर्तीश्च[2] भावयन्त: जपन्ति। श्रवण-मनन-निदिध्यासनात् सदा चिन्तयन्ति। तेषां ज्ञानयोगिनां, नेत्रारविन्दे कमला विहरति[3], तेषां कृपादृष्टिपातेन अन्येषामपि धनैश्वर्यं भवति, का कथा आत्मनामिति भाव:। वक्त्रशुभ्रांशुबिम्बे; वाग्देवी विहरति। तेषां गद्यपद्यमयी वाणी भवतीति भाव:। अथवा हे मात:! ये जना: तव सकलं सगुणं शब्दब्रह्ममयरूपं स्वात्माभेदेन चिन्तयन्त:, इमान् मन्त्रान् जपन्ति, तेषां साधकानां नेत्रारविन्दे इत्यादि सर्वं पूर्ववत् ॥ ६ ॥

**गतासूनां बाहुप्रकरकृतकाञ्चीपरिलस-**
**न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिणयनाम्।**
**श्मशानस्थे तल्पे शवहृदि महाकालसुरत-**
**प्रयुक्तां त्वां ध्यायन् जननि जडचेता अपि कवि: ॥ ७ ॥**

---

[1] पञ्चाशद्वर्णमुण्डालीगलद्रुधिरचर्चिताम्। निरुत्तरतन्त्रम्।
मम कण्ठे स्थितं बीजं पञ्चाशद्वर्णमद्भुतम्। कामधेनुतन्त्रम्।
तथा च विश्वसारतन्त्रे—
परानन्दमयं ब्रह्म शब्दब्रह्मविभूषितम्।
आत्मनो देहमध्ये तु सर्वमन्त्रात्मकं प्रिये ॥ इति ॥
राधातन्त्रे च—
अकारादिक्षकारान्ता पञ्चाशन्मातृकाक्षरा।
अव्यया अपरिच्छिन्ना त्रिपुराकण्ठसंस्थिता।
शुक्लाभा रक्तवर्णाभा पीताभा कृष्णरूपिणी ॥

[2] प्राज्ञस्तु कारणात्मा स्यात् सूक्ष्मदेही तु तैजस:।
स्थूलदेही तु विश्वाख्यस्त्रिविध: परिकीर्तित: ॥
एवमीशोऽपि संप्रोक्त ईश-सूत्र-विराट्-पदै:।
प्रथमो व्यष्टिरूपस्तु समष्ट्यात्मा पर: स्मृत: ॥ देवीगीता ॥

[3] स्पर्धामुद्धूय कमला वाग्देवीमन्दिरे मुखे।
पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितम् ॥ भैरवतन्त्रे ॥

## टीका

गतासूनामिति । हे जननि! त्रिजगतां सृष्टिकर्त्रि! गतासूनां; मृतानाम् । बाहुप्रकरकृतकाञ्चीपरिलसन्नितम्बाम्; करसमूहरचितकटिभूषणशोभमाननितम्बाम् । दिग्वस्त्राम्; दिगम्बरीम् । त्रिभुवनविधात्रीम्; त्रिजगतां भोगमोक्षविधानकर्त्रीम् । त्रिणयनाम्;[1] शशिसूर्याग्निनेत्राम् । श्मशानस्थे शवहृदि तल्पे; श्मशानस्थशवरूपसदाशिवशय्यायाम् । महाकालसुरतप्रयुक्ताम्; परमशिवेन सह रतिक्रीडाभिः निविष्टाम् त्वां ध्यायन् चिन्तयन् जनः जडचेताः; मन्दबुद्धिः सन्नपि, कविः; काव्यरचनाकुशलो भवति ॥ ७ ॥

## स्वरूपव्याख्या

गतासूनामिति। हे जननि! चराचराणामुत्पादयित्रि! गतासूनाम्; मृतानां, बाहुप्रकरकृतकाञ्चीपरिलसन्नितम्बाम्[2]; सर्वे जीवाः कल्पावसाने स्थूलदेहान् त्यक्त्वा स्वस्वकर्मभिः सह लिङ्गदेहमाश्रित्य सगुणब्रह्मरूपिण्याः कारणदेहस्य अविद्यामयांशे पुनः कल्पारम्भपर्यन्तमामोक्षमवतिष्ठन्ते । अत एवात्र मृतजीवानां प्रधानकर्मसाधनभूतैः करणसमूहैः विराड्रूपिण्याः महादेव्याः गर्भधारणयोग्यनिम्नोदरस्य तथा योनिश्च ऊर्ध्वस्थितकटिप्रदेशे काञ्ची कल्पिता इति भावः । दिग्वस्त्राम्; वस्त्रं मायावरणं, तेन शून्यां मायातीतामित्यर्थः । त्रिभुवनविधात्रीम्; पुनः कल्पारम्भे जीवानां स्वस्वसंचितकर्मानुसारेण पुनर्जन्मनां भोगानां च विधानकर्त्रीम् । त्रिणयनाम्; त्रिकालज्ञाम् । श्मशानस्थे[3]; महाप्रलये

---

[1] शशिसूर्यादिभिर्नेत्रैरखिलं कालिका जगत् ।
संपश्यति यतस्तस्मात् कल्पितं नयनत्रयम् ॥ महानिर्वाणतन्त्रम्॥

[2] कर्मणा जायते जन्तुः कर्मणैव विलीयते ।
देहे विनष्टे तत्कर्म पुनर्देहे प्रलभ्यते ॥ महानिर्वाणतन्त्रम् ॥
श्रीदेवीगीतायां च—
तस्यां कर्माणि जीवानां जीवाः कालाश्च संचरे ।
अभेदेनाविलीनाः स्युः सुषुप्तौ व्यवहारवत् ॥
साहं सर्वं जगत् सृष्ट्वा तदन्तः प्रविशाम्यहम् ।
मायाकर्मादिसहिता गिरे प्राणपुरःसरा ॥

[3] महान्त्यपि च भूतानि प्रलये समुपस्थिते ।
शेरतेऽत्र शवो भूत्वा श्मशानं तु ततो भवेत् ॥

सर्वभूतानि शवरूपैः शेरते लीयन्ते यस्मिन् तत्स्थानं तस्मिन् महाकाशे। शवहृदि तल्पे;[1] शवः निर्गुणब्रह्म, तल्पे आधारे, निर्गुणब्रह्मरूपाधारे; निर्गुणब्रह्मरूपस्त्रीयपदे अवस्थिता सतीत्यर्थः। महाकालसुरतप्रयुक्ताम्; कल्पावसाने सृष्ट्यादिकार्याभावात् निष्क्रियत्वाच्च परमशिवेन सह अभिन्नतया अखण्डानन्दमनुभवतीम्। एवं ध्यायन् सच्चिदानन्दरूपिणीं त्वां चिन्तनेन प्रत्यक्षीकुर्वन्। जडचेताः; विषयरागोपहतचित्तो जनोऽपि, कविः महाज्ञानी भवतीति भावः॥ ७॥

**शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः**
**परं संकीर्णायां प्रकटितचितायां हरवधूम्।**
**प्रविष्टां संतुष्टामुपरिसुरतेनातियुवतीं**
**सदा त्वां ध्यायन्ति क्वचिदपि च न तेषां परिभवः॥ ८॥**

### टीका

शिवाभिरिति। घोराभिः; भीमाभिः। शिवाभिः; शृगालैः। शवनिवहमुण्डास्थिनिकरैः; शवसमूहानां कपालैः कङ्कालैश्च। परम्; अत्यन्तम्। संकीर्णायाम्; संकुलायाम्। प्रकटितचितायां प्रविष्टाम्; कृतप्रवेशाम्, श्मशानवह्निमध्यस्थामित्यर्थः। उपरिसुरतेन संतुष्टाम्; महाकालेन सह विपरीतविहारेण आनन्दिताम्। अतियुवतीम्;[2] बाल्यवार्धक्याद्यसंस्पृष्टाम्। हरवधूम्; कालमोहिनीम्। त्वां सदा ध्यायन्ति, अविश्रामं चिन्तयन्ति। तेषाम्; त्वत्साधकानाम्। क्वचिदपि इहामुत्र वा परिभवः; अनादरः न स्यादित्यर्थः॥ ८॥

### स्वरूपव्याख्या

शिवाभिरिति। घोराभिः; भयंकराभिः अतीव दुर्धर्षाभिः। शिवाभिः; शिवप्रकृतिभिः, अपञ्चीकृतमहाभूतैरित्यर्थः। शवनिवहमुण्डास्थिनिकरैः; अत्र अस्थिकङ्कालानां श्वेतवर्णत्वेन

---

[1] शव इत्यक्षरे ब्रह्मवाचकः प्रेतनिर्णयः। गायत्री तन्त्रम्।
गन्धर्वतन्त्रे च—
या शय्या परमेशानि स एव श्रीसदाशिवः।
तस्योपरि महेशानि सूक्ष्मां त्रिपुरसुन्दरीम्॥ इति॥

[2] आद्याप्यशेषजगतां नवयौवनासि। शारदातिलकम्।

सत्त्वगुणं सूचितम्। अत एव महाप्रलये मृतानां जीवानां सत्त्वादिगुणसमूहैः। परं संकीर्णायाम्; अत्यन्तसंकुलायां युक्तायाम्। प्रकटितचितायाम्[1]; स्वप्रकाशरूपायां चिच्छक्तौ। प्रविष्टाम्; अधिष्ठिताम्। उपरिसुरतेन संतुष्टाम्[2]; परमशिवमभिभूय स्वेच्छया सृष्टि-स्थिति-लयादिकार्येषु रममाणाम्। अतियुवतीम्; सदैव एकभावापन्नाम्, अव्ययामित्यर्थः। हरवधूम्; तत्त्वज्ञानप्रदानेन जीवानां त्रितापं हरतीति हरः, तस्य वधूः शक्तिः तां, जीवानां मुक्तिदात्रीमित्यर्थः। एवंभूतां चिदानन्दमयीं त्वां ये साधकाः सदा ध्यायन्ति, अहरहः निश्चलचेतसा प्रत्यक्षीकुर्वन्ति। तेषां क्वचिदपि कस्यामपि योनौ; परिभवः; इत्थंभूतं जन्म पुनर्जन्म न भवति, ते निर्वाणमोक्षं लभन्त इत्यर्थः॥ ८॥

**वदामस्ते किं वा जननि वयमुच्चैर्जडधियो**
**न धाता नापीशो हरिरपि न ते वेत्ति परमम्।**
**तथापि त्वद्भक्तिर्मुखरयति चास्माकममिते**
**तदेतत्क्षन्तव्यं न खलु पशुरोषः समुचितः॥ ९॥**

टीका

वदाम इति। हे अमिते![3] इयत्तारहिते! हे जननि! त्रिजगतामुत्पादयित्रि। ते; तव, परमं; यथार्थतत्त्वम्। धाता; ब्रह्मा, न वेत्ति; न जानाति। ईशः;

---

[1] चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत्। श्रीचण्डी।

[2] वामा या दक्षिणं जित्वा महामोक्षप्रदायिनी। निर्वाणतन्त्रम्।

तथा गन्धर्वतन्त्रे—

अधःकृत्वा तु पुरुषं हकारार्धस्वरूपिणी।
विपरीतेन रमते वह्नीन्दुर्कस्वरूपिणी॥ इति।

निरुत्तरतन्त्रे च—

विपरीतरता काली निर्गुणा सगुणा यदा। इति।

वासिष्ठरामायणे च—

अस्वभावात्मता सर्गः स्वभावैकात्मता शिवः। इति।

[3] अमा स्यान्निर्गुणे सापि अनिरुद्धसरस्वती। निरुत्तरतन्त्रम्।

महाकालसंहितायाम्—

अचिन्त्यामिताकारशक्तिस्वरूपा प्रतिव्यक्त्यधिष्ठानसत्त्वैकमूर्तिः।
गुणातीतनिर्द्वन्द्वबोधैकगम्या त्वमेका परब्रह्मरूपेण सिद्धा॥ इति॥

रुद्रः, अपि न जनाति। हरिः; विष्णुः, अपि न वेत्ति। उच्चैः; अत्यन्तम्। जडधियः; मन्दबुद्धयः। वयं ते तव संबन्धे किं वदामः कथयामः। तथापि; अज्ञत्वेऽपि। त्वद्भक्तिः; तव स्तवनोद्देश्यकप्रवृत्तिः। अस्मान्; मुखरयति स्तुतिवचनेषु प्रेरयति। तत्; तस्माद्धेतोः। अस्माकमेतत् तदयोग्यं कर्म। क्षन्तव्यम्; सहनीयम्। खलु; निश्चितम्। पशुरोषः; अज्ञानेषु कोपः, न समुचितः; न योग्यो भवति॥ ९॥

## स्वरूपव्याख्या

हे अमिते! गुणपरिच्छेदरहिते! निर्गुणे इत्यर्थः। हे जननि[1]! हे ब्रह्मविष्णुरुद्रादीनामस्माकं च उत्पादयित्रि। अत एव ते; तव, परमम्; परमतत्त्वम्, धाता; जीवानां कर्मानुसारेण जन्मादिविधानकर्ता, ब्रह्मा; न वेत्ति न जानाति। ईशः; ऐशीशक्तिसंपन्नरुद्रोऽपि न वेत्ति। हरिः; जीवानां त्रितापहारकः विष्णुरपि न वेत्ति। यतः त्वं तेषामपि जननी। अत एव जगन्मातुस्तव स्वरूपतत्त्वस्य ज्ञानमेतेषु कथं संभवति? स्वस्वजनन्याः जन्मकर्मादिवेदनं संतानानामतीवासंभवमित्यर्थः। उच्चैः जडधियो वयम् ते किं वदामः? यत् ब्रह्मादयो देवेशाः तव स्वरूपं न जानन्ति; किंचिल्लौकिकमात्रज्ञानवन्तः वयं तव स्वरूपकथने कथं समर्था भवाम इति भावः। तथापि त्वद्भक्तिर्मुखरयति; तव गुणकथने अयोग्याः, तथापि तव विषयिणी भक्तिः किंचित् गुणकथने अस्मान् प्रेरयति। तत्; अस्माकमेतत् क्षन्तव्यम्। पशुरोषः; न समुचितः, न योग्यो भवति॥ ९॥

---

[1] एकानेका सूक्ष्मरूपाविकारा ब्रह्माण्डानां कोटिकोटिं प्रसूषे।
कोऽहं विष्णुः को परो वा शिवाख्यो देवाश्चान्ये स्तोतुमीशा भवेम॥ देविसूक्तम्॥
तथा च देवीमाहात्म्ये—
विष्णोः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्॥ इति॥
विष्णुयामले च—
मातस्त्वत्परमं रूपं न च जानाति कश्चन।
काल्यादिस्थूलं यद्रूपं तदर्चन्ति दिवौकसः॥ इति॥
पुनः महाकालीस्तोत्रे च—
यदा नैव धाता न विष्णुर्न रुद्रो न काली न वा पञ्चभूतानि चासन्।
तदा कारणीभूतसत्वैकमूर्तिस्त्वमेका परब्रह्मरूपेण सिद्धा॥ इति॥

**समन्तादापीनस्तनजघनधृग्यौवनवती-**
**रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।**
**विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः**
**समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥ १० ॥**

### टीका

समन्तादिति । हे मातः[1]! वीराचाररतः तव साधकः । यदि नक्तं[2]; निशीथे । समन्तादापीनस्तनजघनधृग्यौवनवतीरतासक्तः; सर्वतः सम्यक् पीवरस्तनजघनधारिण्या युवत्या सह मैथुनरतः सन् आनन्दमयो भूत्वा । विवासाः; दिगम्बरः । गलितचिकुरः; मुक्तकेशः सन् । त्वाम्; महाकालेन सह, सदा सुरतानन्दनिरतां ध्यायन्, स्वीयहृदि चिन्तयन् प्रत्यक्षीकुर्वन् । तव मनुम्; तव पूर्वोक्तमन्त्रराजं जपति । समस्ताः सिद्धौघाः; सर्वार्थसिद्धयः । तस्य; वीरसाधकस्य; वशगाः; वशीभूता भवन्ति । स च कविः सन्, भुवि पृथिव्याम् । चिरतरं; सुदीर्घकालं व्याप्य जीवति ॥ १० ॥

### स्वरूपव्याख्या

अस्मिन् लययोगो वर्ण्यते । समन्तादिति । हे मातः! जननि! भक्त; दिव्याचाररतः योगी साधकः । यदि नक्तम्;[3] निशायाम्, ब्रह्मविद्यालक्षणायां सर्वभूतनिशायां

---

[1] अभिषेककृतो मन्त्री कुलपूजां समाचरेत् ।
कुलाचारं विना देवि कालीमन्त्रं न सिध्यति ॥ निरुत्तरतन्त्रम् ॥

[2] रात्रौ नग्नः शयानश्च मैथुने सुव्यवस्थितः ।
अथ वा मुक्तकेशश्च तस्य सर्वार्थसिद्धयः ॥ फेट्कारिणीतन्त्रम् ॥

कालीक्रमे च—

स्वाचारनिरतो नित्यं दिवा लक्षं जपेत् पशुः ।
दिव्यो वाप्यथवा वीरो रात्रौ लक्षजपं चरेत् ॥ इति ॥

कुब्जिकातन्त्रे च—

पशुभावरता ये च केवलं पशुरूपिणः ।
रात्रौ मन्त्रं च मालां च न स्पृशेत्तु कदाचन ॥ इति ॥

[3] या निशा सर्वभूतानां तस्यां जागर्ति संयमी । भगवद्गीता ।

प्रबुद्धः सन्नित्यर्थः । समन्तादापीनस्तनजघनधृग्यौवनवतीरतासक्तः ;[1] सर्वदिग्विदिक् स्थितानां जीवानामुत्पादयित्र्या पालयित्र्या च नित्ययुवतीरूपया कुलकुण्डलिनीशक्त्या सह जीवात्मानं परमात्मनि लीनं कुर्वन् सन्। अत्र स्तनजघनधृक्[2] इत्यनेन कुलकुण्डलिन्याः जगतां सृष्टि-स्थिति-कर्तृत्वं सूचितम्। विवासाः ; विगतं वासः मायावरणः यस्य तथा-भूतः, प्रबुद्ध इत्यर्थः । गलितचिकुरः ; गलितं नष्टं चिकुरत्वं चापल्यं यस्य सः, निश्चल-चित्तः सन्। त्वां परमशिवेन सह सामरस्यानन्दनिरताम्, त्वां चिन्तयन्, तव मन्त्रराजं मनसा जपति ; स तत्त्वज्ञानी भूत्वा दिव्यौघ-सिद्धौघ-मानवौघसदृशचिरजीवी भवतीत्यर्थः । समस्ताः सिद्धौघाः, अत्र बहुवचनप्रयोगेण दिव्यसिद्धमानवौघानां ग्रहणं बोद्धव्यम्॥ १० ॥

**समाः सुस्थीभूतो जपति विपरीतां यदि सदा**
**विचिन्त्य त्वां ध्यायन्नतिशयमहाकालसुरताम् ।**
**तदा तस्य क्षोणीतलविहरमाणस्य विदुषः**
**कराम्भोजे वश्या पुरहरवधू सिद्धिनिवहाः ॥ ११ ॥**

टीका, स्वरूपव्याख्या च

समा इति । हे पुरहरवधू! हे त्रिपुरहरसुन्दरि! सुस्थीभूतः ;[3] निश्चल-चित्तः । यदि विपरीताम् ; विपरीतभावापन्नाम् । अतिशयमहाकालसुरताम् ; कामेश्वर-

---

[1] योनिमुद्रां समासाद्य स्वयं शक्तिमयो भवेत् ।
सुश्रृङ्गाररसेनैव विहरेत् परमात्मनि ।
आनन्दमयः संभूय ऐक्यं ब्रह्मणि सम्भवेत् ॥ घेरण्डसंहिता ॥
तथा च गोरक्षसंहितायाम्—
जीवेन सहितां शक्तिं समुत्थाप्य शिरोम्बुजे ।
स्वयं शक्तिमयो भूत्वा शिवेन च सुसङ्गमम् ।
नानासुखं विहारं च चिन्तयेत् परमं पदम् ॥ इति ॥

[2] ध्यायेत् कुण्डलिनीं देवीमिष्टदेवस्वरूपिणीम् ।
सदा षोडशवर्षीयां पीनोन्नतपयोधराम् ।
श्यामां सूक्ष्मां सृष्टिरूपां सृष्टि-स्थिति-लयात्मिकाम् ॥ तन्त्रकल्पद्रुमः ॥

[3] शान्तः शुचिर्मिताहारो भूशायी भक्तिमान् वशी ।
निर्द्वन्द्वः स्थिरधीर्मौनी संयतात्मा जपेत् प्रिये ॥ कुलार्णवतन्त्रम् ॥

महाकालेन सह अत्यर्थं रतानन्दनिरतां, सृष्ट्युन्मुखीं त्वां ध्यायन्[1] सन्, तव मन्त्रार्थं चिन्तयन्। समाः; संवत्सरं व्याप्य, सदा; सर्वदा विचिन्त्य, त्वां ध्यायन् जपति[2] तव मन्त्रजपं करोति। तदा; तर्हि, क्षोणीतलविहरमाणस्य; भूतले सुखेन निवसतः विदुषः; पण्डितस्य। तस्य कराम्भोजे; करकमलतले, सिद्धिनिवहाः; श्रीविद्यायाः इच्छासिद्ध्यादिशक्तिसमूहाः। वश्याः; वशीभूता भवन्तीत्यर्थः। महासिद्धिनिवहा इति पाठे, सालोक्य-सारूप्य-सायुज्य-निर्वाणाख्याः, तस्य आयत्ता भवन्तीत्यर्थः॥ ११ ॥ इत्यस्य स्वरूपव्याख्या च॥

**प्रसूते संसारं जननि भवती पालयति च**
**समस्तं क्षित्यादि प्रलयसमये संहरति च।**
**अतस्त्वं धातासि त्रिभुवनपतिः श्रीपतिरपि**
**महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीम्॥ १२॥**

### टीका, स्वरूपव्याख्या च

प्रसूत इति। हे जगतामुत्पादयित्रि! संसारम्; जगत् प्रपञ्चम् प्रसूते भवती जनयति। अतस्त्वं धाता ब्रह्मा; तस्य सृष्टिशक्तिरित्यर्थः। भवती जगतीं पालयति च बिभर्ति च। अतः अस्माद्धेतोः त्वं त्रिभुवनपतिः श्रीपतिरपि त्रिलोकीश्वरः विष्णुर्भवति; तस्य जगत्पालनकारिणी वैष्णवीशक्तिः त्वमसीत्यर्थः। प्रलयसमये; जगत्संहारसमये। समस्तं क्षित्यादि; पञ्चमहाभूतात्मकं जगत्। संहरति; स्वीयकारणदेहे लीनं करोति। अतस्त्वं महेशोऽपि रुद्रश्च भवसि; त्वं संहारशक्तिरिति भावः। सकलमपि, स्थावरजङ्गमात्मकजगतः निमित्तकारणमुपादानकारणं चासीति भावः। अतः भवतीं जगदेककारणभूतामद्वितीयां त्वां किं स्तौमि?

---

[1] जपस्यादौ शिवां ध्यायेत् ध्यानस्यान्ते पुनर्जपेत्।
जपध्यानसमायुक्तः शीघ्रं सिध्यति साधकः॥ कौलावलीतन्त्रम्॥

[2] मनसा मन्त्रवर्णस्य चिन्तनं मानसं स्मृतम्।
वाचिकस्य शतं ज्ञेयमेकोत्तरमुपांशुना।
तस्माच्छतगुणं प्रोक्तं मानसं जपमुत्तमम्॥ कौलावलीतन्त्रम्॥

तव स्वरूपाख्यानं किं करोमि । त्वमेव वाचातीतेति भावः । उक्तं च त्रिपुटास्तोत्रे—

> “ क्षितिस्त्वं विधाता जगत्सृष्टिकर्त्री त्वमापोऽपि विष्णुर्जगत्पालिका च ।
> त्वमग्निस्तु रुद्रो जगत्क्षोभकर्त्री त्वमैश्वर्यरूपा वियद्वायुरूपा ॥ ”

इति । तथाच स्तोत्रान्तरे—

> “ उत्पत्तिस्थितिसंहृतीर्घटयितुं धत्ते त्रिरूपां तनुं
> त्रैगुण्याज्जगतस्त्वदीयविकृतिर्ब्रह्माच्युतः शूलभृत् ॥ ”

इति ॥ १२ ॥

**अनेके सेवन्ते भवदधिकगीर्वाणनिवहान्**
**विमूढास्ते मातः किमपि न हि जानन्ति परमम् ।**
**समाराध्यामाद्यां हरिहरविरिञ्च्यादिविबुधैः**
**प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम् ॥ १३ ॥**

### टीका, स्वरूपव्याख्या च

अनेक इति । हे मातः ! अनेके बहवो जनाः । भवदधिकगीर्वणनिवहान्; त्वदतिरिक्तदेवसमूहान् आराधयन्ति । विमूढाः; विचारशून्याः ते जनाः किमपि परमं;[1] किंचिदपि परमतत्त्वम् , न हि जानन्ति न विदन्ति । हरिहरविरिञ्च्यादि-

---

[1] कूर्मपुराणे श्रीकूर्म उवाच—

सर्ववेदान्तवेदेषु निश्चितं ब्रह्मवादिभिः ।
एकं सर्वगतं सूक्ष्मं कूटस्थमचलं ध्रुवम् ।
अनन्तमक्षरं ब्रह्म केवलं निष्कलं परम् ।
योगिनस्तत् प्रपश्यन्ति महादेव्याः परं पदम् ॥
परात्परतरं तत्त्वं शाश्वतं शिवमच्युतम् ।
अनन्तं प्रकृतौ लीनं देव्यास्तत्परमं पदम् ॥
शुभं निरञ्जनं शुद्धं निर्गुणं द्वैतवर्जितम् ।
आत्मोपलब्धिविषयं देव्यास्तत्परमं पदम् ॥ इति ॥

विबुधैः;[1] ब्रह्मविष्णुरुद्रादिसुरेशैः। समाराध्याम्; सदा उपास्याम्। आद्याम्; जगतः आदिकारणभूताम्। रतिरस[2]महानन्दनिरताम्; महाकालेन सह रतिः विपरीतरमणं, तथा रसं मद्यपानं ताभ्यामुत्पन्नं यन्महानन्दं तस्मिन् निरताम्। त्वां ब्रह्माद्यैराराध्यां चिदानन्दरूपिणीं भवतीं स्वैरमतिशयेन। प्रपन्नोऽस्मि शरणागतोऽस्मि ॥ १३ ॥

**धरित्री कीलालं शुचिरपि समीरोऽपि गगनं**
**त्वमेका कल्याणी गिरिशरमणी कालि सकलम्।**
**स्तुतिः का ते मातर्निजकरुणया मामगतिकं**
**प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः ॥ १४ ॥**

टीका, स्वरूपव्याख्या च

धरित्रीति। हे कालि! कालभयनिवारिणि! त्वं धरित्री[3] क्षितिः; कीलालं

---

तत्रैव च श्रीदेवीवचनम्—
वस्तु मे निष्कलं रूपं चिन्मयं केवलं परम्।
सर्वोपाधिविनिर्मुक्तमनन्तममृतं पदम् ॥
ज्ञानेनैकेन तल्लभ्यमक्लेशेन परं पदम्।
ज्ञानमेव प्रपश्यन्ती मामेव प्रविशन्ति ते ॥ इति ॥
तथाच योगिनीतन्त्रे—
परमानन्दकं रूपं जगतां कारणं महत्।
तस्या देव्यास्तु तद्रूपमुदयास्तविवर्जितम् ॥ इति ॥

[1] महामहाब्रह्मविद्या विद्येयं कालिका मता।
वामामाद्य च निर्वाणमुक्तिमेति नराधमः ॥ इति ॥
तथा च अर्गलास्तोत्रे—
चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि। ...... ॥

[2] पीत्वा कुलरसं वीरो ब्रह्मध्यानमुपाश्रयेत्।
ब्रह्मध्यानं महेशानि ब्रह्मनिर्वाणकारणम् ॥ योगिनीतन्त्रम् ॥

[3] त्वं भूमिस्त्वं जलौघस्त्वमसि हुतवहस्त्वं जगद्वायुरूपा
त्वं चाकाशो मनश्च प्रकृतिरपि महत्पूर्विकाहंकृतिश्च।
आत्मा चैवासि मातः परमपि भवती त्वत्परं नैव किंचित्
क्षन्तव्यो मेऽपराधः प्रकटितरदने कामरूपे कराले ॥ गुह्यार्णवतन्त्रम् ॥

जलम्; शुचिः अग्निः; अपि समीरः वायुः; अपि गगनम्, आकाशम्; एका अद्वितीया; कल्याणी; निर्वाणमोक्षदानेन जीवानां मङ्गलविधायिनी। गिरिशरमणी; शिवानी; गिरौ कूटे शेते इति गिरिशः कूटस्थब्रह्म, तस्य रमणी ह्लादिनीशक्तिः। त्वं निर्विकारापि[1] स्वकीयाघटनघटनापटीयसीमायया क्षित्यादिचतुर्विंशतितत्त्वरूपिणीत्यर्थः। सकलं; सर्वं चराचरं च "सर्वं खल्विदं ब्रह्म" इति श्रुतिः, "सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते" इति चण्डी। हे मातः; ते तव स्तुतिः का? सर्वस्वरूपायास्तव स्तुतिर्न संभवतीति भावः। त्वं निजकरुणया; स्वीयासाधारणकृपया। अगतिकम्; साधनहीनत्वादनुपायम्। मां प्रति प्रसन्ना भूयाः प्रसीद, भवमनु; संसारे इत्यर्थः। मम जनुः; जन्म न भूयात् न भवतु; मां स्वीयाभयपदे लीनं कुर्वित्यर्थः॥ १४॥

**श्मशानस्थः सुस्थो गलितचिकुरो दिक्पटधरः**
**सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमम्।**
**जपंस्त्वत्प्रत्येकं मनुमपि तव ध्याननिरतो**
**महाकालि स्वैरं स भवति धरित्रीपरिवृढः॥ १५॥**

टीका

श्मशानस्थ इति। हे महाकालि! महाकालशक्ते! तु; पुनः, यो जनः श्मशानस्थः;[2] प्रेतभूमौ अवस्थितः। सुस्थः; स्थिरचित्तः। गलितचिकुरः; मुक्तकेशः। दिक्पटधरः; दिगम्बरः सन्। तव ध्याननिरतः; त्वदीयम्, "मेघाङ्गी विगताम्बरा" इत्यादिस्थूलरूपं चिन्तयन्। त्वत्; तव मनुमपि मन्त्रराज्ञीं च जपन् उच्चारयन्। निजगलितवीर्येण; स्वीयस्खलितशुक्रेण तदनुलिप्तमित्यर्थः। अर्काणां

---

[1] एकानेका सूक्ष्मरूपाविकारा ब्रह्माण्डानां कोटिकोटिं प्रसूते। देवीसूक्तम्।

[2] श्मशानस्थो भवेत् सुस्थो गलितं चिकुरं चरेत्।
दिगम्बरः सहस्रं च सूर्यपुष्पं समर्पयेत्॥
स्ववीर्येण युतं कृत्वा प्रत्येकं प्रजपन् हुनेत्।
ध्यात्वाभ्यर्च्य महाभक्त्या कुलालापः स्तवं पठेत्॥ महाकालसंहिता।

सूर्यपुष्पाणाम् आकन्द इति ख्यातानाम् । सहस्रं कुसुमं; दशशतसंख्यानि पुष्पाणि । प्रत्येकम्; एकैकं त्वामुद्दिश्य ददतीति शेषः । स साधकः स्वैरम्; अनायासेन, धरित्रीपरिवृढः; भूपतिर्भवति ॥ १५ ॥

## स्वरूपव्याख्या

श्मशानस्थ इति । तु पुनः दिव्यानां पक्षे । हे महाकालि! परब्रह्मरूपिणि; यो जनः श्मशानस्थः; महाप्रलयसमये सर्वभूतानि शवरूपेण लीयन्ते यस्मिन् तत् श्मशानं परब्रह्म, तस्मिन् आसक्तचित्तः ब्रह्मपरायण इत्यर्थः । सुस्थः; स्थिरचित्तः, दिक्पटधरः; मायावरणरहितः, निर्विकारचित्तः । तव ध्याननिरतः; त्वदीयसच्चिदानन्दरूपं चिन्तयन्नित्यर्थः । उक्तं च रुद्रयामले—

"चिद्रूपां ज्ञाननिलयां चैतन्यानन्दविग्रहाम् ।
कोटिसौदामिनीभासां सर्वतत्त्वस्वरूपिणीम् ।
आश्रित्य प्रजपेन्मन्त्रं कुलमार्गाश्रयो नरः ॥"

इति । तव मनुमपि जपन् त्वदीयमन्त्रराजं मनसा उच्चारयन् सन् । निजगलितवीर्येण[1]; सहस्रारकमलात् स्वाभाविकक्षरितं यत् अमृतं तेन सह । अर्काणां सहस्रं कुसुमं; ब्रह्मरन्ध्रावस्थितं[2] आदित्याख्यचित्तोद्भवानि, चित्तवृत्तिरूपाणि दयाज्ञानक्षमादिरूपभाव-

---

[1] हृत्पद्ममासनं दद्यात् सहस्रारच्युतामृतैः ।
पाद्यं चरणयोर्दद्यात् मनस्त्वर्घ्यं निवेदयेत् ।
चित्तं प्रकल्पयेत्पुष्पं धूपं प्राणान् प्रकल्पयेत् ॥ महानिर्वाणतन्त्रम् ॥
ब्रह्मरन्ध्रचन्द्रपात्रात् तर्पयेत् तारिणीं पराम् ।
तत्रस्थसूर्यपात्राच्च अर्घ्यं दद्यान्मनोहरम् ॥
दयाज्ञानक्षमापुष्पं पुष्पमिन्द्रियनिग्रहम् ।
ज्ञानदानपुण्यपुष्पमहिंसापुष्पमुत्तमम् ॥
आनन्दपुष्पं दातव्यं पुष्पं च साधकार्चनम् ।
दशपुष्पं यः प्रदद्यात् स गच्छेत् तारकं पदम् ॥ तारारहस्यम् ॥

[2] सूर्याग्रे वसते चित्तं चन्द्राग्रे जीवितं प्रिये । ज्ञानसंकलिनीतन्त्रम् ।
तथा च याज्ञवल्क्यसंहितायाम्—
इडायां चन्द्रमा ज्ञेयो पिङ्गलायां रविः स्मृतः । इति ।

पुष्पाणि। प्रत्येकम्; एकैकं त्वामुद्दिश्य ददाति मानसोपचारविधिना चिदग्नौ तुभ्यं समर्पयति। स दिव्यसाधकः स्वच्छन्देन धरित्रीपरिवृढः; धरित्र्याः पृथिव्याः पार्थिवदेहस्य इन्द्रियादिवृत्तीनामधिपो भूत्वा सहजावस्थां[1] प्राप्नोतीति भावः ॥ १९ ॥

**गृहे संमार्जन्या परिगलितवीर्यं हि चिकुरं**
**समूलं मध्याह्ने वितरति चितायां कुजदिने।**
**समुच्चार्य प्रेम्णा मनुमपि सकृत्कालि सततं**
**गजारूढो याति क्षितिपरिवृढः सत्कविवरः ॥ २० ॥**

## टीका

गृह इति। हे कालि! कालनाशिनि! यो जनः वीरसाधकः। गृहे। संमार्जन्या परिगलितवीर्यम्; संमार्जनी लिङ्गम्, स्वशक्त्या रमणजनितनिःसृतं शुक्रम्। तथा समूलं चिकुरं; मूलेन सह उत्पाटितं केशं च। कुजदिने; मङ्गलवासरे। मध्याह्ने;[2] दिनमध्यभागे, अर्धरात्रे वा। प्रेम्णा; भक्त्या। तव मनुम्; ते मन्त्रं समुच्चार्य। चितायाम्; श्मशाने। सकृदपि;[3] एकवारमपि। वितरति, तुभ्यं निवेदयति।

उक्तं च प्राणाग्निहोत्रे—

तत्र सूर्योऽग्निर्नाम सूर्यमण्डलाकृतिः सहस्ररश्मिभिः परिवृतः एक ऋषिर्भूत्वा स हि तिष्ठति ॥ इति ॥

[1] उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्मणः।
योगिनः सहजावस्था स्वयमेवोपजायते।
कालिका तनुतामेति चिदादित्यप्रकाशनात् ॥ महोपनिषत् ॥
उत्तमा सहजावस्था मध्यमा ध्यानधारणा।
जपस्तुतिः स्यादधमा होमपूजाधमाधमा ॥ कुलार्णवे ॥

[2] नखं केशं स्ववीर्यं च यद्यत्संमार्जनीगतम्।
मुक्तकेशो दिगम्बरो मूलमन्त्रपुरःसरः ॥
कुजवारे मध्यरात्रे होमं कृत्वा श्मशानके।
पठेन्नामसहस्रं यः पृथ्वीशाकर्षणं चरेत् ॥ ककारकूटारहस्यम् ॥

[3] सदाशिवेन देवेशि क्षणमात्रं रमेत् प्रिये।
अमृतं जायते देवि तत्क्षणात् परमेश्वरि ॥
तदुद्भवामृतं देवि लाक्षारस समायुतम्।
तेनामृतेन देवेशि तर्पयेत् परदेवताम् ॥ गन्धर्वमालिकायाम् ॥

हि ; निश्चितम् । स जनः, सत्कविवरः ; सत्कविश्रेष्ठः, क्षितिपरिवृढः ; भूपतिश्च सन् । सततम् ; सर्वदा । गजारूढः ; हस्त्यारूढः सन्, याति ; सर्वत्र विचरतीत्यर्थः ॥ १६ ॥

स्वरूपव्याख्या

गृह इति । हे कालि ! कालभयनिवारिणि ! यो जनः दिव्याचाररतः साधकः । गृहे ; सहस्रदलकमलरूपब्रह्मसदने । संमार्जन्या परिगलितवीर्यं ; परमशिवेन कुलकुण्डलिन्या रमणोद्भूतं वीर्यामृतम् । समूलं चिकुरं ; चाञ्चल्यादिवृत्तिसहितं मनः । कुजदिने ; मङ्गलवासरे । मध्याह्ने ; द्विप्रहरे रात्रौ दिवसे वा । प्रेम्णा ; परया भक्त्या । तव मनुं मन्त्रं समुच्चार्य । सकृदपि ; एकवारमपि । चितायां ; चिद्रूपायां त्वयि, वितरति विलीनं करोति, निर्बीजसमाधिं[1] करोतीति यावत् । स भुक्तिं मुक्तिं च लभत इत्यर्थः ॥ १६ ॥

**स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो**
**पुरो ध्यायन्ध्यायन् यदि जपति भक्तस्तव मनुम् ।**
**स गन्धर्वश्रेणीपतिरपि कवित्वामृतनदी-**
**नदीनः पर्यन्ते परमपदलीनः प्रभवति ॥ १७ ॥**

टीका

स्वपुष्पैरिति । हे मातः ! भक्तः वीरसाधकः । यदि स्वपुष्पैराकीर्णम् ;[2] स्वयंभूकुसुमैः व्याप्तम् । कुसुमधनुषो मन्दिरम् ; योनिम् । पुरः ; अग्रे । ध्यायन् ध्यायन् ; पुनः पुनश्चिन्तयन् । तव मनुम् ; अयुतसंख्याकमन्त्रं जपति । अहो ; आश्चर्यम् । स गन्धर्वश्रेणीपतिः ; गायकश्रेष्ठः । अपि च कवित्वामृतनदीनदीनः ; कवित्वामृतस्य नद्यः तासां नदीनः समुद्रः, अशेषकवित्वाधारः । पर्यन्ते ; देहाव-

---

[1] सर्ववृत्तिनिरोधात् निर्बीजसमाधिः । पातञ्जलसूत्रम् ।

[2] मातृकाभेदतन्त्रे—

विवाहितायाः कन्यायाः प्रथमे ऋतुसंभवे ।
तच्छोणितं महेशानि स्वपुष्पं सर्वमोहनम् ॥ इति ॥
रजःकीर्णं भगं नार्याः ध्यायन् योऽयुतमाजपेत् ।
स कवित्वेन रम्येण जनान्मोहयति ध्रुवम् ॥ तन्त्रकल्पद्रुमः ॥

साने । परमपदलीनः प्रभवति; तव उत्कृष्टपदे विलीनः सन् , सृष्ट्यादि कार्ये समर्थो भवतीति भावः ॥ १७ ॥

स्वरूपव्याख्या

स्वपुष्पैरिति । अस्मिन् योनिमुद्रासाधनं वर्ण्यते । उक्तं च शाक्तागमे—

"मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
लक्षकोटिजपेनापि तस्य विद्या न सिध्यति ॥"

इति । हे मातः! भक्तः दिव्याचाररतः योगी साधकः । यदि स्वपुष्पैराकीर्णम्; स्वयंभूलिङ्गरूपकुसुमेनाधिष्ठितम् । कुसुमधनुषो मन्दिरम्; मूलाधारस्थितत्रिकोणमण्डलं, हृत्पद्मस्थितत्रिकोणमण्डलं वा । उक्तं च शिवसंहितायां—

"तस्मिन्नाधारपाथोजे कर्णिकायां सुशोभना ।
त्रिकोणा वर्तते योनिः सर्वतन्त्रेषु गोपिता ॥"

इति । पुनस्तत्रैव चतुर्थपटले—

"ब्रह्मयोनिगतं ध्यात्वा कामं बन्धूकसंनिभम् ।
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ॥
तस्योर्ध्वे तु शिखा सूक्ष्मा चिद्रूपा परमा कला ।
तया पिहितमात्मानमेकीभूतं विचिन्तयेत् ॥"

इति । यथा च तारारहस्ये—

"स्वकीयहृदये ध्यायेत् योनिमण्डलमुत्तमम् ।
रजोभिश्च समोपेतं त्रिकोणं सर्ववर्णकम् ॥"

इति । पुरः; निजाग्रे, ध्यायन् ध्यायन्; चिन्तयन् । तव; मन्त्रार्थघटितरूपं तस्मिन् भावयन् । उक्तं च भूतशुद्धितन्त्रे—

"यस्य यस्य च मन्त्रस्य उद्दिष्टा या च देवता ।
चिन्तयित्वा तदाकारं मनसा जपमाचरेत् ॥"

इति । कुलार्णवे च—

"तन्निष्ठस्तद्गतप्राणस्तच्चित्तस्तत्परायणः ।
तत्पदार्थानुसंधानं कुर्वन् मन्त्रं जपेत्प्रिये ॥"

इति । तव मनुम्; तव मन्त्रराजम् जपति; शनैः शनैः मनसा जपति । उक्तं च तत्रैव—"शनैः शनैरविस्पष्टं न द्रुतं न विलम्बितम्" इति । स गन्धर्वश्रेणीपतिः; गायकश्रेष्ठः, "गानात् परतरं न हि" इति दर्शनात् । अथवा चित्ररथगन्धर्वराज इव । अपि च कवित्वामृतनदीनदीनः; महाकविः कालिदास इव भवति । अपि च पर्यन्ते; देहावसाने । परमपदलीनः[1] प्रभवति; सच्चिदानन्दरूपायां त्वयि विलीनः सन् निर्वाणपदं लभत इति भावः । योनिमुद्रासाधनफलं शिवसंहितायां—"अभ्यासाज्जायते सिद्धिरभ्यासान्मोक्षमाप्नुयात्" इति । ॥ १७ ॥

**त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां**
**महाकालेनोच्चैर्मदनरसलावण्यनिरताम् ।**
**समासक्तो नक्तं स्वयमपि रतानन्दनिरतो**
**जनो यो ध्यायेत्त्वामयि जननि स स्यात् स्मरहरः ॥ १८ ॥**

टीका

त्रिपञ्चार इति । अयि जननि! हे मातः! यो जनः; साधकः, नक्तम्; रात्रौ । समासक्तः; त्वयि आसक्तचित्तः । स्वयम्; आत्मनापि । रतानन्दनिरतः; सुरतानन्दयुक्तः सन् । त्रिपञ्चारे पीठे[2]; पञ्चदशकोणयुक्ते यन्त्रे । शवशिवहृदि; शवरूपसदाशिवहृदये । स्मेरवदनाम्; स्मितमुखीम् । महाकालेन; परमशिवेन सह । उच्चैः; अत्यन्तम् । मदनरसलावण्यनिरताम्; विपरीतरतिमाधुर्यासक्ताम् । त्वां ध्यायेत् चिन्तयेत् । सः साधकः स्मरहरः स्यात्, साक्षात् शिवो भवेदित्यर्थः ॥१८॥

[1] देवीगीतायां देवीवाक्यम्—
तदैव तस्य चिन्मात्रे मद्रूपे विलयो भवेत् । इति ।
अपरं (१३) श्लोकस्य टीकायां द्रष्टव्यम् ॥

[2] आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् ।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम् ॥
मध्ये तु बैन्दवं चक्रं बीजमायाविभूषितम् ।
षट्कोणात्तु बहिर्वृत्तं ततोऽष्टदलकं न्यसेत् ॥
बहिर्वृत्तेन संयुक्तं भूपुरेकेन संयुतम् ।
ज्ञात्वैव मुक्तिमाप्नोति यन्त्रराजं न संशयः ॥ कालीतन्त्रम् ॥

## स्वरूपव्याख्या

त्रिपञ्चारे इति । अयि जननि ! अस्माकमुत्पादयित्रि ! यो जनः नक्तम्; अर्धरात्रौ । उक्तं च—

"महानिशायां ब्राह्मे वा मुहूर्ते ध्यानतत्परः ।
तद्रूपं परमानन्दं तदा पश्यति निश्चितम् ॥"

इति । समासक्तः; त्वयि एकाग्रचित्तः । स्वयम्; आत्मनापि । रतानन्दनिरतः [1]; योनिमुद्रामवलम्ब्य स्वयं शक्तिमयो भूत्वा परमात्मना सह लयरूपरतानन्दासक्तः सन्नित्यर्थः । त्रिपञ्चारे पीठे [2]; अविद्यारूपवृत्तवेष्टिते; क्षित्याद्यष्टप्रकृतिरूपाष्टदलयुक्ते, पञ्चज्ञानेन्द्रिय-पञ्चकर्मेन्द्रिय-पञ्चप्राणरूपत्रिकोणविशिष्टे, शुद्धसत्वात्मिकामायाप्रतिबिम्बितचैतन्यरूपबिन्द्वात्मकबीजभूषिते, क्षित्यादिपञ्चभूतात्मक[3]भूपुरान्विते स्वदेहयन्त्रे इत्यर्थः । शवशिवहृदि; शववत् निष्क्रियस्य शिवस्य हृदये, स्वकीयनिर्गुणब्रह्मपदे स्थिता सती, इच्छा-क्रिया-ज्ञानयुक्तया मायया शिवशक्तिविभागेन चणकाकारवत् द्विधा भूत्वेत्यर्थः । महाकालेनोच्चैर्मदनरसलावण्यनिरताम् [4]; सगुणब्रह्मपरमशिवेन सह विपरीत-

[1] योनिमुद्रां समासाद्य स्वयं शक्तिमयो भवेत् ।
सुश्रृङ्गाररसेनैव विहरेत् परमात्मनि ।
आनन्दमयः संभूय ऐक्यं ब्रह्मणि संभवेत् ॥ घेरण्डसंहिता ॥

[2] तथा मन्त्रात्मकं चक्रं देवतायाः परं वपुः ।
शिवशक्त्यात्मकं यन्त्ररूपिणी ब्रह्मरूपिणी ॥
निजदेहाख्ययन्त्रं तु सर्वयन्त्रात्परं स्मृतम् ॥ गन्धर्वतन्त्रम् ॥

[3] भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ गीतायाम् ॥
तथा च गन्धर्वतन्त्रे—
पञ्चप्राणमनोबुद्धिर्दशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥
अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यदात्मानमवधारय ॥ इति ॥

[4] यदा सा परमा शक्तिः स्वेच्छया विश्वरूपिणी ।
अधःकृत्वा तु पुरुषं सङ्गमेच्छाभवत्तदा ॥
तदाक्रम्य स्वयं देवी भैरवोपरि संस्थिता ।
सहजानन्दसंदोहैर्निजानन्दप्रवर्धिनी ॥

भावेन नियतयुक्ताम्। स्मेरवदनाम्; सदानन्दमयीम्; त्वाम्; ब्रह्मरूपिणीं यो ध्यायेत्[1]; स्वीयदेहयन्त्रे चिदाभासरूपेण स्थितत्वात् स्वात्माभेदेन त्वां चिन्तयेत्। उक्तं च देवीमाहात्म्ये—"या देवी सर्वभूतेषु छायारूपेण संस्थिता।" इति। गान्धर्वतन्त्रे च—

"निर्लेपं निर्गुणं शुद्धं स्वात्मानं त्रिपुरामयम्।
आत्माभेदेन संचिन्त्य याति तन्मयतां नरः॥"

इति। स स्मरहरः स्यात्; अद्वैतभावसंपन्नः साधकः परमात्मनि त्वयि लीनो भूत्वा कैवल्यपदं लभेदित्यर्थः॥ १८॥

**सलोमास्थि स्वैरं पललमपि मार्जारमसिते**
**परं चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा।**
**बलिं ते पूजायामयि वितरतां मर्त्यवसतां**
**सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति॥ १९॥**

### टीका

सलोमेति। असिते! हे कालिके! ते तव पूजायां नैमित्तिकार्चनायाम्। मार्जारं[2] मार्जारसंबन्धि, औष्ट्रं उष्ट्रसंबन्धि, मैषं मेषसंबन्धि, नरमहिषयोः नरमहिषसंबन्धि; अपि वा; अथवा छागं छागसंबन्धि, सलोमास्थि लोमास्थिसहितम्। परम्; उत्कृष्टं, पललं; मांसं, बलिं; पूजोपहारं, स्वैरं; स्वच्छन्दं, वितरतां; ददतां साधकानां, प्रतिपदं पदे पदे, अपूर्वा; आश्चर्या, सर्वा, सर्वविधा सिद्धिः कर्मसफलता, प्रभवति प्रकर्षेण संपद्यते॥ १९॥

[1] अथवाऽद्वैतभावेन चात्मानं तन्मयं स्मरेत्।
अद्वैतभावसंपन्नस्त्रिपुरीकृतविग्रहः।
आत्मन्येव यजेद्देवीमुपचारैर्यथाविधि॥ गान्धर्वतन्त्रम्॥

[2] अस्थिलोमत्वचा युक्तं मांसं मार्जारमेषयोः।
उष्ट्रस्य महिषस्यापि बलिं यस्तु समर्पयेत्।
मातेव दक्षिणा तस्य मातेव हितकारिणी॥ श्यामारहस्ये॥

### स्वरूपव्याख्या

सलोमेति । अयि असिते![1] न सिता बद्धा असिता, नित्यमुक्तस्वभावा । ते; तव, पूजायाम्; अन्तर्यागविधौ, मानसपूजायामित्यर्थः । मार्जरादिसंबन्धि सलोमास्थिपललम्; सर्वावयवसमन्वितान् षडरिपुरूपमार्जरादिपशून्[2] इत्यर्थः । अत्र छागः कामः, महिषः क्रोधः, मार्जारः लोभः, नरः मदः, मेषः मोहः, उष्ट्रः मात्सर्यमिति गुणसाम्यात् बोध्यम् । बलिं वितरताम्;[3] कामादीनां विनाशकामनया चिद्रूपायां त्वयि पूजोपहाररूपेण ददताम् । सतां मर्त्यवसताम्; साधुशीलानां जनानाम् । प्रतिपदम्; पदे पदे, यथाक्रममित्यर्थः; अपूर्वा; सर्वोत्कृष्टा । सर्वा सिद्धिः; पञ्चविधा मुक्तिः ।[4] प्रभवति प्रकर्षेण संपद्यते । एवंविधाः साधकाः सालोक्यादिका मुक्तीः लभन्त इत्यर्थः ॥ १९ ॥

**वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो**
**दिवा मातर्युष्मच्चरणयुगलध्याननिपुणः ।**
**परं नक्तं नग्नो निधुवनविनोदेन च मनुं**
**जपेल्लक्षं स स्यात् स्मरहरसमानः क्षितितले ॥ २० ॥**

### टीका

वशीति । हे मातः! यो जनः वशी जितेन्द्रियः । हविष्याशनरतः;[5] जपान्ते हविष्याशी सन् । दिवा; दिवसे । युष्मच्चरणयुगलध्याननिपुणः; तव पादपद्मद्वयचिन्तायाम्, एकान्तनिरतः सन् । लक्षं; लक्षसंख्याकं मन्त्रं प्रजपति । परम्; पुनश्च । नक्तम्; रजन्याम् । नग्नः; विवस्त्रः । निधुवनविनोदेन[6] च; सुरतप्रमोदेन

---

[1] षिञ् बन्धने—क्तः=सितः । बद्धार्जुनौ सितौ । इत्यमरः ।

[2] कामक्रोधौ छागवाहौ बलिं दत्त्वा प्रपूजयेत् । अन्नदाकल्पे ।

[3] धर्माधर्महविर्दीप्ता वात्माग्नौ मनसा स्रुचा ।
सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ॥
स्वाहा . . . . . . . . . . । बृहन्नीलतन्त्रम् ।

[4] सालोक्यमपि सारूप्यं सार्ष्टयं सायुज्यमेव च ।
कैवल्यं चेति तां विद्धि मुक्तिं राघव पञ्चधा ॥ श्रीशिवगीता ॥

[5] यो हविष्याशनरतो दिवा देवीं स्मरन् जपेत् ।
नक्तं निधुवनासक्तो लक्षं स स्यात् धरापतिः ॥ तन्त्रकल्पद्रुमः ॥

[6] भवेन्निधुवनं कम्पे सुरते च नपुंसकम् । मेदिनी ।

विशिष्टः सन् । लक्षं मनुम्; लक्षसंख्यकमन्त्रं जपेत् । स क्षितितले; पृथिव्याम् । स्मरहरसमानः; शिवतुल्यः स्यात् भवेत् । "सम्यक्" इति पाठे तु यथोक्तविधानेन सेतुमहासेतुकुल्लुकादिकं जप्त्वा इत्यर्थः ॥ २० ॥

### स्वरूपव्याख्या

वशीति । यो जितेन्द्रियः हविष्याशी; साधकः । दिवा; दिवसे, पश्चाचारेण तव पादपद्मचिन्तायाम् एकान्तासक्तः सन् । लक्षम्; लक्षसंख्याकं तत्र मन्त्रं प्रजपति । पुनः नक्तम्; रजन्यां कुलाचारेण, नग्नः; मायावरणरहितः निर्विकारः सन्नित्यर्थः । निधुवन-विनोदेन च; निधुवनविनोदः[1] रमणं तेन विशिष्टः सन्, परशक्त्यात्ममिथुनसंयोगानन्दरतः सन्नित्यर्थः । तव लक्षसंख्याकं मन्त्रं जपेत्; स पृथिव्यां स्मरहरसमानः; शिवसदृशः, जीवन्मुक्तो भवेदित्यर्थः ॥ २० ॥

**इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः**
**स्वरूपाख्यं पादाम्बुजयुगलपूजाविधियुतम् ।**
**निशार्धं वा पूजासमयमधि वा यस्तु पठति**
**प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥ २१ ॥**

### टीका

इदमिति । हे मातः! यस्तु यो जनः पुनः । तव मनुसमुद्धारणजनुः; तव मनूनां मन्त्राणां समुद्धारणे सम्यगुद्धारणे जनुः उत्पत्तिर्यस्य तत् । पादाम्बुजयुगल-पूजाविधियुतम्; तव श्रीपादपद्मस्य पूजानियमसहितम् । स्वरूपाख्यम्; तव स्वरूपस्य स्वस्य आत्मनो रूपं तस्य, [2]निजनिर्गुणसगुणभेदेन स्थूल-सूक्ष्म-कारण-तुरीयात्मकध्यानस्य आख्या कथनं यस्मिन् तत् । इदं स्तोत्रं, निशार्धम्; मध्यरात्रं

[1] परशक्त्यात्ममिथुनसंयोगानन्दनिर्भरः ।
य आस्ते मैथुनं तत्स्यादपरे स्त्रीनिषेवकाः ॥ कुलार्णवतन्त्रम् ॥

[2] यज्जीवब्रह्मणोरैक्यं सोऽहमस्मीति वेदनम् ।
तदेव निर्गुणं ध्यानमिति ब्रह्मविदो विदुः ॥ शिवार्चनचन्द्रिका ॥

पूजासमयं वा अधि अधिकृत्य पठति[1] उच्चैरुदीरयति । तस्य प्रलापः; अनर्थकवाक्यमपि । कवित्वामृतरसः;[2] कवित्वरूपसुधास्वादपूर्णः । प्रसरति, निःसरति; तस्य गद्यपद्यमयी वाणी भवतीत्यर्थः ॥ २१ ॥

**कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलं**
**वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ।**
**रिपुः कारागारं कलयति च तं केलिकलया**
**चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः ॥ २२ ॥**

इति श्रीमन्महाकालविरचितं श्रीमद्दक्षिणकालिकायाः
स्वरूपाख्यं स्तोत्रं समाप्तम्

टीका, स्वरूपव्याख्या च

कुरङ्गाक्षीति । कुरङ्गाक्षीवृन्दम्; मृगनयनारमणीसमूहः । प्रेमतरलम्; अनुरागचञ्चलम् । तम्; साधकम्, अनुसरति; अनुगच्छति । क्षोणीपतिः; क्षितीश्वरोऽपि, तस्य वशः; तद्वशीभूतः । कुबेरप्रतिनिधिः; सः कुबेरतुल्यः धनवान् भवति । रिपुः; तस्य शत्रुः । तम्; एतत् स्तोत्रपाठकं कारागारं बन्धनागारवत् भीषणम् । कलयति; गणयति । सः प्रतिजनुः; जन्मनि जन्मनि, भक्तः; त्वयि भक्तिमान् सन्, चिरम्; बहुकालं व्याप्य, केलिकलया; अनायासेन, जीवन्मुक्तः; विदेहमुक्तो भवति । अथ वा स भक्तः केलिकलया क्रीडाकौतुकेन चिरं दीर्घकालं व्याप्य जीवन् प्राणान् धारयन्, मुक्तः देहान्ते मुक्तिं प्राप्तः सन्, प्रतिजनुः; प्रतिनिवृत्तं जनुः जन्म यस्य सः; पुनर्जन्मरहितो भवति, स ब्रह्मनिर्वाणं[3] प्राप्नोतीति भावः ॥ २२ ॥

[1] मनसा पठितं स्तोत्रं वाचा वापि मनुं जपेत् ।
उभयोर्निष्फलं देवि भिन्नभाण्डोदकं यथा ॥ विशुद्धेश्वरतन्त्रम् ॥

[2] यस्यैकवारपठनात् सर्वे विघ्नाः समाकुलाः ।
नश्यन्ति दहने दीप्ते पतङ्गा इव सर्वतः ।
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् ॥ कालीकुलसर्वस्वे ॥

[3] महाकालरुद्रोदितस्तोत्रमेतत् सदा भक्तिभावेन योऽध्येति भक्तः ।
न चापन्न शोको न रोगो न मृत्युर्भवेत्सिद्धिरन्ते च कैवल्यलाभः ॥ महाकालसंहिता ॥

या काली कालकान्ता कलयति कलुषं कीर्तिता कालहन्त्री
या ताराताररूपा कमलजमहिता ब्रह्मविद्या परा च ।
श्रीविद्या मोक्षपन्था हरिहरनमिता साधकानां हितार्था
सा देवी सर्वरूपा जनयतु जननी स्तावकानां शुभानि ॥
येनैव स्तवराजेन महाकालेन वर्णितम् ।
कालिकायाः स्वरूपं च भक्तानन्दविधायकम् ॥
कर्पूराद्यं हि यत्स्तोत्रं वासनापरिसेवितम् ।
व्याख्यान्तरेण भणितं सरलार्थविशोभितम् ॥
मुनिनेत्रभूधरेन्दुशाके माने मया कृता ।
साधकानां विबोधाय विमलानन्देन धीमता ॥
व्याख्येयं स्वरूपार्था च विमलानन्ददायिनी ।
पठतामपि भक्तानां सदा कण्ठे विराजतु ॥
कोटालिपाडनगरे शुनकान्ववाये
गोष्ठीपतिर्हरिहरो महतां गरिष्ठः ।
कालीप्रसाद इति तत्कुलजो महात्मा
तस्यात्मजो रघुमणिर्विहितक्रियावान् ॥
तत्पुत्त्रो विमलानन्दस्वामी तच्चरणानुगः
सतीशचन्द्ररायाख्यश्चौधुरीपदभूषितः ॥
कर्पूरादिस्तोत्रटीका तत्कृता कृतिनां मुदे ।
वर्त्ततां कालिकाप्रीत्यै चापि संजायतामियम् ॥

अस्य टीका विमलानन्ददायिनी स्वरूपव्याख्या च समाप्ता

॥ ॐ तत् सत् ॐ ॥

# APPENDIX I

ॐ

ओं नमः कालिकायै

## कर्पूरस्तवराजव्याख्या रहस्यार्थसाधिका

अथ भगवानादिपुरुषो महाकालः परमकृपया घोरेऽस्मिन् संसारे संतप्तानां साधकानां सुखोपायेन मुक्त्युपायं चिकीर्षुराद्याशक्तेः अनन्तगुणायाः कतिपयगुणगुम्भित-स्रग्धराशिखरिणीच्छन्दोनिर्मितेन पद्येन नानामतेन स्तुतिमुपक्रमते—महाकाल उवाचेति। अत्र आदिबीजावयववर्णनवाचकत्वेन तद्वर्णनचिन्तनवाच्यत्वेन च त्रिगुणीकृत्य तस्य जपादेव सर्वसिद्धिसंपत्करत्वं कवित्वकुशलत्वं च कलयति—कर्पूरमिति। कर्पूरमिति स्वरूपम्, मध्यमान्त्यस्वररहितम्, मध्यमस्वरौ ककारपकारोत्तरावकारौ, अन्त्यस्वरो रेफात्परोऽकारः, परौ पकाररेफौ तै रहितम्। तेन क्र इति भवति। कीदृशं तत्? सेन्दुवामाक्षियुक्तम्; चन्द्रबिन्दुसहित ईकारः, तेन युक्तम्। अनेन क्रीमिति भवति। हे मातः! हे त्रिपुरहरवधु! हे ध्वान्तधाराधररुचिरे! ध्वान्तमन्धकारम्, धाराधरः मेघः, तयोः रुचिरिव रुचिरं रूपं यस्याः; ते; तव, एतद्बीजं त्रिःकृतम्; त्रिवारात्मकं कृत्वा, ये जपन्ति। तेषां; साधकानाम्। कीदृशानाम्? सर्वसिद्धिं गतानाम्; अणिमादिसर्व-सिद्धिं प्राप्तानाम्, वाचः; वाक्यानि गद्यानि पद्यानि च, मुखकुहरात्; मुखविवरात् स्वच्छन्दं यथा तथा, उल्लसन्त्येव; आयासं विनापि स्वयमाविर्भवन्त्येवेति ॥ १ ॥

ओं नमः कालिकायै

## कर्पूरादिस्तोत्रटीका

*नत्वा श्रीकालिकां भक्त्या गुरुं च गुणवारिधिम्।*
*स्वरूपस्तवराजस्य व्याख्यां कुर्वे सुबोधिनीम् ॥*

*तत्र प्रथमं तावदाद्यबीजस्योद्धारमाह—कर्पूरमिति । हे जननि ! मध्यमान्तिमस्वरपरहीनं साब्जं दक्षिणेतरनेत्रयुतं कर्पूरमिति पदं[1] तव पूर्वं बीजं ज्ञेयम् । हे त्रिपुरासुरारिमहिले ! एतत्पूर्वोक्तं ते बीजं त्रिभिरावर्तितं ये भक्ताः जपन्ति, तेषां गद्यरूपाणि च संस्कृतानि, श्लोकरूपाणि च पद्यानि वदनकंदरात् निष्क्रामन्त्येव । हे गाढतिमिरकंधररुचिरुचिरे ! निखिलसिद्धिं प्राप्तानां तेषां स्वतन्त्रं वाण्यो मुखकुहरादुल्लसन्तीति मन्त्रमयसूक्ष्मरूपेण वर्णयति ॥ १ ॥*

कूर्चबीजमन्त्रोद्धारकथनेन तदाकृतिध्यानकीर्तनेन च तद्द्वन्द्वजपात् मदनतुल्यता वा वित्तेषु विजयितां विकासयति—ईशान इति । हे महेशि ! हे चन्द्रार्धचूडे ! चन्द्रस्यार्धं चूडायां यस्याः सा । हे महाघोरवाणावतंसे ! वाति गच्छतीति वाणं शरीरम्, घोरौ भयानकौ शरीरौ अवतंसौ कर्णभूषणे यस्याः सा । ईशानः; हकारः, सेन्दुवामश्रवणपरिगतः; इन्दुः अर्धेन्द्रः, तेन सह वामश्रवणं दीर्घ उकारः, तेन युक्तम् । अनेन हूमिति भवति । द्वन्द्वम्; द्विगुणं कृत्वा । कदाचित् शुभे अशुभे वा काले, मन्दचेताः; जडो जनः, वारम् एकं यदि जपति, तदा वाचामधीशम्; वाचस्पतिम्, सुरगुरुं विद्यया, धनदमपि; कुबेरमपि संपदा जित्वा, अम्बुजाक्षीबृन्दम्; अम्बुजस्येव पद्मदलस्येव आक्षिणी यासां तासां बृन्दं समूहं मोहयन् मुग्धीकुर्वन् सन्, चिरं चिरकालं व्याप्य प्रभवति प्रभुर्भवति ॥ २ ॥

*द्वितीयबीजस्योद्धारमाह—ईशान इति । "महाकालो महेश्वरः" इति श्रुतेः, हे उत्पत्तिस्थितिप्रलयसाक्षिमहेशदयिते ! स शशाङ्कः वामश्रोत्रमिलित ईशान[2] इति पदं त्वदीयं पूर्वोक्तबीजात् अन्यत् कूर्चबीजं बालिशोऽपि जनः कस्मिंश्चित्काले द्विरावृत्तं (हूंहूं) इत्येवंरूपमेकवारमपि यदि जपति, तर्हि वाग्विलासैः बृहस्पतिम्, धनवैभवविलासैः धनदमपि जित्वा, हे विकसितहिमकरखण्डमौले ! हे भयजनकशवाभरणे ! कमलनयनायूथं मोहयति च, परं स सर्वस्यापि जगतः प्रभुर्भवतीति जपे कालनियमाभावजपफलप्रदर्शनपुरःसरं कूर्चबीजद्वयमुद्धरति ॥ २ ॥*

---

[1] अत्र कर्पूरपदे मध्यमौ स्वरौ 'क', मध्यस्थोऽकारः 'पूं' मध्यस्थ ऊकारः; अन्त्यस्वरश्च 'र' मध्यस्थोऽकारः तैर्हीनम् । पुनश्च पराभ्यां हीनमित्येवं कृते क् मात्रं रेफमात्रं चावशिष्यते । तदेव सानुस्वारं वामनेत्रेण दीर्घेकारेण युतम्; एतावता क्रीमिति भवति ।

[2] अत्र बिन्दुशिरस्कवामनेत्रेण दीर्घेकारेण च सहित ईशानो हकारः, इति कृते हूमिति भवति ।

इदानीं मायाबीजाङ्गशोधकत्वेन तद्रूपध्यानत्वेन च तस्य द्विगुणीकृतजपात् शत्रुनाशकत्वं संसारवशित्वं च विभावयति—ईश इति। ईशः; हकारः, वैश्वानरस्थः; रेफस्थः, चन्द्रः; बिन्दुः, तेन विलसत् वामनेत्रम्, ईकारः, तद्युक्तम्। तेन ह्रीमिति भवति। हे विगलितचिकुरे! विशेषेण गलितः चिकुरः केशो यस्याः। हे कालिके! कृष्णवर्णे! हे सृक्कद्वन्द्वास्रधाराद्वयधरवदने! सृक्कद्वन्द्वे अस्रधारा रक्तधारा तद्द्वयं ध्रियते येन वदनेन, एवंभूतं वदनं यस्याः। हे दक्षिणे! मुक्तिदाननिपुणे! कालिके! जगत्संहारिणि! अतिप्रकर्षेण महाप्रलयकारिणीति यावत्। तेन वाग्बीजं द्वन्द्वं द्विगुणं कृत्वा ये जपन्ति; ते द्वेष्टारम्; शत्रुं घ्नन्ति च, वै; निश्चयेन अभितः सर्वतो भावेन भुवनं वश्यभावं नयन्ति च ॥ ३ ॥

*तृतीयबीजस्योद्धारफलमाह—ईश इति। हे विकीर्णकेशकलापे! मृगाङ्कविलसद्दक्षिणेतराक्ष्णा युतो वैश्वानरस्थः ईश[1] इति पदं पूर्वोक्तादन्यत् त्वदीयं द्विरावृत्तं (ह्रीं ह्रीं) इत्येवं रूपं मायाबीजम्; हे कालिके! ये साधका जपन्ति, ते प्रत्यर्थिनो निघ्नन्ति; हे सृक्कयुग्मरक्तप्रवाहयुगलधरमुखि! च परं, त्रिलोकीमपि स्वाधीनतां नयन्तीति मायाबीजोद्धारप्रदर्शनपुरःसरमाह ॥ ३ ॥*

अभिमुखाभिधानतयाननभुजास्त्रसंस्थानाभिधायकतया च तज्जपादिष्टसिद्धिं करस्थां विदधाति—ऊर्ध्वमिति। हे अम्ब! हे मातः! हे प्रकटितवदने! प्रकटितं विस्तारितं वदनं यस्याः। हे त्रिजगदघहरे! त्रयाणां जगताम् अघं पापं हरति नाशयति। ऊर्ध्वे वामे वामोर्ध्वे हस्तपद्मे कृपाणं खड्गम्; तथा अधःकरकमलतले नृमुण्डम्; सव्ये दक्षिणोर्ध्वे हस्तपद्मे च अभीः अभयमुद्रा; अभीरिति, "सुपां सुलुक्" इत्यनेन द्वितीयार्थे प्रथमा। तथा अधःकरपद्मे वरम्, वरमुद्रां च; मनुविभवम्; मन्त्रघटकीभूतम्; 'दक्षिणे कालिके' चैतन्नाम जप्त्वा, तव एतद्रूपं वा निश्चयेन ये जना भावयन्ति चिन्तयन्ति, तेषां जनानाम्, त्र्यम्बकस्य; शिवस्य, अष्टौ सिद्धयः; अणिमाद्यष्टसिद्धयः, करस्था भवन्ति ॥ ४ ॥

*नामाक्षरविन्यासफलमाह—ऊर्ध्वं इति। हे त्रितयलोककिल्बिषनाशिनि! हे प्रकटीकृतवक्त्रे! हे मातः! वामपाणितले ऊर्ध्वं खड्गम्, अधःकरे छिन्नं शिरः, तथा*

---

[1] मृगाङ्केन बिन्दुना शोभमानो दक्षिणेतराक्ष्णा दीर्घेकारेण युक्तश्च परं वैश्वनरस्थो रेफयुक्तो हकारः। एतावता हकाररकारबिन्दुदीर्घेकारैर्मिलितं ह्रीमिति भवति।

*सव्यकरे ऊर्ध्वाधः अभयं वरं च, (दधती त्वां ध्यात्वा) पश्चात् दक्षिणे कालिके! इत्येतन्नामवर्णं जप्त्वा, ते मन्त्रविभवं ये भावयन्ति, तेषां साधकानां दक्षिणामूर्तिशिव-संबन्धिन्योऽष्टावणिमाद्याः सिद्धयो हस्तगता एवेति। बीजसप्तककथनान्ते दक्षिणे कालिके चेति विन्यस्यति ॥ ४ ॥*

सप्तबीजेन वह्निजायां....स्थिरीभूताभावप्रतियोगित्वमवतारयति—वर्गाद्यमिति। हे मातः! हे स्मितमुखि! ईषद्धास्यमुखि! हे स्मरहरमहिले! कामाङ्गहरवनिते! वर्गाद्यम्; ककारम्, वह्निसंस्थम्; रेफम्, विधुः; चन्द्रबिन्दुः, रतिः; ईकारः, ताभ्यां वलितं भूषितं तम्; तेन क्रीमिति बीजं स्यात्। ततः कूर्चबीजद्वयम्, मायाद्वयं च; ततः पश्चात् स्वाहां योजयित्वा, ते तव रूपं भावयन्तः सन्तः ये जयन्ति; ते लक्ष्मी-लास्यलीलाकमलदलदृशः; लक्ष्म्या नृत्तलीलायुक्तकमलदलतुल्यनेत्राः सन्तः कामरूपा भवन्तीत्यर्थः ॥ ५ ॥

*कालिकोपनिषदुक्तमन्त्रोद्धारमाह—वर्गाद्यमिति। हे स्मेरवदने! कृशानुसहितं चन्द्ररतिललितं वर्गपूर्वं रकारदीर्घकारानुस्वारैर्मीलितं वर्गाद्यमक्षरं ककारमिति कृते क्रीमिति सिद्धम्; त्रिरावृत्तम् क्रीं क्रीं क्रीमिति। कूर्चद्वयं हूंहूमिति। ततश्च लज्जाद्वन्द्वं ह्रीं ह्रीमिति। तदधः ठद्वयं स्वाहा इति योजयित्वा, हे अम्ब! हे मारहरगृहिणि! त्वत्परमं चिन्तयन्तो ये ये पुरुषा जपन्ति, ते ते रमानृत्यनिधुवननलिनदलाक्षाः कंदर्परूपा भवन्तीति। तथा च "अथ हैनां ब्रह्मरन्ध्रे ब्रह्मरूपिणीमाप्नोति सुभगां कामरेफेन्दिराबिन्दुमेलनरूपामेतत् त्रिगुणितामादौ, तदनु कूर्चद्वयं भुवनाद्वयं दक्षिणे कालिके इत्यस्ति मुख्यता, तदनु बीजसप्तकमुच्चार्य बृहद्भानुजायामुच्चारयेत्, स तु शिवमयो भवेत्, सर्वसिद्धीश्वरो भवेत्, गतिस्तस्याकुण्ठिता भवेत्, स तु नारीश्वरः, स तु वागीश्वरः, स तु देवेश्वरः, स तु सर्वेश्वरः" इत्यादिकालिकाश्रुत्युक्तमन्त्रोद्धारसा-म्यार्थं पुनरेतद्बीजसप्तकं स्वाहान्तं मनुमुद्धरति ॥ ५ ॥*

मन्त्रभेदजपेन यत्समानाधिकरणात्यन्ताभावस्वसिद्धः, तच्छ्रियाः सामानाधिकरण्यं प्रतिपादयति—प्रत्येकमिति। हे देवि! देदीप्यमाने! हे मुण्डस्रगतिशयलसत्कण्ठि! मुण्डस्रजा मुण्डमालया अतिशयविलासिनः कण्ठो यस्याः। हे पीनस्तनाढ्ये! पीनौ

स्थूलौ स्तनौ ताभ्याम्, आढ्या संपन्ना। प्रत्येकं वा एकमेकं पृथक्पृथक् बीजरूपम् एकाक्षरम्, तेन आदिबीजं कूर्चबीजम्; मायाबीजं ठद्वयं वा, आदिबीजद्वयं कूर्चबीजद्वयं वा, परं; श्रेष्ठम्; आदिबीजत्रयमत्यन्तगुह्यं च, प्रत्येकमपि त्वन्नाम्ना यो जपित्वा, सकलमपि; सकलं पूर्वोक्तं सकलम्, नेत्रारविन्दे विहरति कमला; नेत्रस्य कमलदलतुल्यत्वात् लक्ष्म्याः कमले निवासत्वाच्च तेषां नेत्रकमले कमला लक्ष्मीः विहरति। वक्त्रशुभ्रांशुबिम्बे! वक्त्रस्य चन्द्रसादृश्यत्वात् मुखरूपचन्द्रमण्डले वाग्देवी सरस्वती विहरति ॥ ६ ॥

*बीजत्रयं त्वन्नाम्ना सह जपतां फलमाह—प्रत्येकमिति। हे नरमुण्डमालाविलसद्ग्रीवामांसवक्षोजयुते! हे देवि! प्रत्यक्षरं द्वयं वा त्रितयमपि, अथवा सकलं चातिगोप्य बीजं त्वन्नाम्ना योजयित्वा, सदा ध्यायन्तः सन्तः ये जपन्ति, तेषां जापकानां नयनारविन्देऽरविन्दालया विहरति; च परं, वदनशीतांशुबिम्बे भाषा विलसतीति परमकारुण्यं द्योतयन्नाह ॥ ६ ॥*

प्रलयेऽपि प्रकृतिपुरुषयोरवस्थानध्यानफलं ज्ञापयति—गतासूनामिति। हे जननि! स्मशानस्थे तल्पे; श्मशानस्थभस्मशय्यायां, शवहृदि; शवाकारशिवहृदि, महाकालसुरतप्रयुक्ताम्; महाकालेन सह सुरतप्रयुक्तां त्वां ध्यायन्, जडचेताः; मूर्खोऽपि कविः पण्डितः स्यात्। त्वां कीदृशीम्? गतासूनाम्; मृतानाम्, बाहुप्रकरकृतकाञ्चीपरिलसन्नितम्बाम्; बाहुसमूहेन कृतकाञ्ची, तया परिलसत् नितम्बो यस्याः। पुनः किंभूताम्? दिग्वस्त्राम्; दिगेव वस्त्रं यस्याः। पुनः किंभूताम्? त्रिभुवनविधात्रीम्; त्रिभुवनकर्त्रीम्, त्रिणयनाम्; त्रिलोचनाम् ॥ ७ ॥

*अतिमूढस्यापि तव ध्यानात्कवित्वप्राप्तिमाह—गतासूनामिति। हे अम्ब! अत्यन्तलिगुरपि शवानां भुजनिकररचितकटिसूत्रविलसज्जघनां ककुप्प्रावरणां त्रैलोक्यस्य कर्त्रीं त्र्यम्बकां शवदहनभूमिस्थां गतप्राणहृदयशय्यायां महेश्वरविपरीतरतात्यासक्तां त्वां चिन्तयन् सन् कविर्भवतीति ॥ ७ ॥*

प्रलयप्रकटरूपिण्याः परकृताः परमपुरुषेण परमानन्दध्यानयोगाभ्यासपूर्वं प्रदर्शयन्नाह—शिवाभिरिति। ये जनाः त्वाम् अतियुवतीम् स्थिरयौवनाम्। उपरिसुरतेन;

विपरीतरमणेन संतुष्टां सदा नित्यं ध्यायति। तेषां क्वचिदपि; कुत्रापि, परिभवः; पराजयं न भवति। त्वां किंभूताम्? हरवधूम्; शिवसुन्दरीम्; पुनः किंभूताम्? शिवाभिः घोराभिः; भयानकाभिः, शवनिवहमुण्डास्थिनिकरैः; प्रेतसमूहस्य मुण्डानामस्थ्नां च निकरैः समूहैः, परं; केवलं, संकीर्णायां; व्याप्तायाम्, प्रकटितचितायां प्रविष्टां; संस्थितामिति ॥ ८ ॥

*ध्यानासक्तस्य भक्तस्य न कदाचिदपि पराभव इत्याह—शिवाभिरिति। हे शिवपत्नि! भयजनकाभिः क्रोष्ट्रीभिः गतासुसमूहमुण्डास्थिकरप्रकरैः अत्यन्तं व्याप्तायां ज्वलच्चितायां प्रविष्टां तत्रैवोपरि सुरतक्रीडया अतिसंतुष्टां यौवनवतीं (वातिक्रान्त-युवतीम्)त्वां निरन्तरं ये साधकाः चिन्तयन्ति, तेषां साधकानां सर्वदेशेष्वपि निखिलजगन्नाशकाले;*

*"यथा ध्यानस्य संसर्गात्कीटको भ्रमरायते।*
*तथा समाधियोगेन ब्रह्मीभूतो भवेन्नरः॥"*

*इत्युक्तेः संप्राप्तशिवरूपत्वान्नास्ति तिरस्कार इत्याह॥ ८॥*

गुणमूर्तयोऽपि ब्रह्मादयः ते परमं न वेत्तारः, कुतोऽन्ये? तथात्वेऽपि स्तोतव्य-मित्यत आह—वदाम इति। हे असिते! कालिके! तव परमम्; औत्कर्ष्यं धाता ब्रह्मा न वेत्ति; ईशः शिवोऽपि न; हरिः विष्णुरपि न वेत्ति; न जानाति। उच्चैः; अतिशयेन, जडधियः मन्दबुद्धयः वयं; ते तव किं वदामः। तथापि त्वद्भक्तिः; तव विषये भक्तिः, अस्माकं मुखरयति; स्तोतुं प्रकटयति। अस्माकमिति द्वितीयार्थे षष्ठी। हे जननि! तत् त्वयात्र तदसंभावनीयं क्षन्तव्यं मह्यम्, खलु निश्चितम्। पशुरोषः; पशौ पशुतुल्ये रोषः क्रोधः न समुचितः, न न्याय्यः। तेन कृतार्था वयमिति भावः॥ ९॥

*ब्रह्मादीनामप्यगोचरे मद्रूपे वाक्यप्रयोगाय प्रवर्तमानस्य तवायं दीर्घापराधः कथं क्षन्तव्य इत्याशङ्कासमाधानपूर्वकमाह—हे मातः! त्वदीयं पारमार्थिकं मनो-वागतीतं रूपं सकलप्रपञ्चस्रष्टा धाता याथातथ्येन न वेत्ति; च परम्, सकलप्रपञ्च-संहर्ता महेशोऽपि न वेत्ति; तथा सकलप्रपञ्चपालको हरिरपि न वेत्ति। तथा*

बालिशा वयम् अतितरं ते रूपं प्रति किं वादमः[1] । हे कालिके! तथापि वक्तुमयोग्यान् अस्मान् त्वदीया भक्तिरेव वाचालं करोतीत्येतत्प्रवर्तनं सोढव्यम् । पशुरोष इति ;

"घृणा लज्जा भयं शङ्का जुगुप्सा चेति पञ्चमी ।
कुलं शीलं तथा जातिरष्टौ पाशा इमे स्मृताः ॥
पाशबन्धः पशुः प्रोक्तः पाशमुक्तः स्वयं शिवः ।"

इत्युक्तेः पशुष्वविद्यया पाशाष्टकेषु माहशेषु पामरजनेषु रोषो न योग्यः । किलेति संभावनायाम् ॥ ९ ॥

लतालक्षणावच्छिन्नतया महाचीनक्रमस्य साधनान्तावच्छेदकतया च सर्वसिद्धिवशित्वं सूचयति—समन्तादिति । यदि भक्तः विवासाः ; दिगम्बरः, गलितचिकुरः समन्तादापीनस्तनजघनधृग्यौवनवतीरतासक्तः ; समन्तात् सर्वतः, आ सम्यक् पीनौ स्थूलौ स्तनौ जघनौ च ध्रियेते यया, तस्यां यौवनवत्यां रतासक्तः क्रीडासक्तः सन् नक्तं रात्रौ त्वां ध्यायन्, तव मनुं मन्त्रं जपति, तस्य समस्ताः सिद्धौघाः सिद्धिसमूहाः अणिमादयो वशगा भवन्ति । भुवि ; पृथिव्यां चिरकालं जीवति कविर्भवति ॥ १० ॥

प्रयोगान्तरेण नक्तं ध्यायतो फलमाह—समन्तादिति । हे परितः मांसलकुचनितम्बधृग्यौवनवति ! दिगम्बरः, विकीर्णचिकुरकलापः रात्रौ सुरतपरः (यद्वा परितः मांसलकुचनितम्बधृग्यौवनवतीसुरतासक्तः) भक्तः, (यद्वा परितः मांसलकुचनितम्बधृग्यौवनवतीं) त्वां चिन्तयन् सन् तावकीनं मन्त्रं जपति, तस्य भक्तस्य निखिलाः सिद्धिनिचयाः स्वाधीना भवन्ति । पृथिव्यां कविर्भूत्वा दीर्घसमयं जीवतीति पठान्तरकल्पना च याथातथ्येनोह्या निखिलतन्त्रस्वतन्त्रमनीषिभिः ॥ १० ॥

तत्र तावत्परप्रकृतेः प्रधानतया साधनभेदादनायासेन महासिद्धिसमूहवशतां साधयति—समाः स्वस्थीभूत इति । हे हरवधु! यदि ; भक्तः, समाः ; संवत्सरम् अविच्छेदेन, सदा ; सर्वकाले, स्वस्थीभूताम् ; आत्मरूपावस्थितां विचिन्त्य, विपरीताम्

---

[1] नालं वक्तुं जडधिषणात्वादितिभावः ।

अतिशयम् अत्यन्तम्, महाकालेन सुरतां त्वां ध्यायन् पूर्वोक्तमन्त्रं जपति, सदा तस्य क्षोणीतलविहरमाणस्य; क्षोणी पृथिवी तस्याः तले उपरि यत्र कुत्र गच्छतो विदुषः ध्यानपण्डितस्य, कराम्भोजे; करतले, महासिद्धिनिवहाः; खेचरत्वादिसिद्धिसमूहाः, वश्याः; वशीभूताः तिष्ठन्तीत्यर्थः ॥ ११ ॥

*वैपरीत्येन जपतः सर्वसिद्धिप्रदत्वमाह—समास्विति । हे मृडानि! अतिनिश्चलमानसः (यद्वा समानकायशीर्षः, स्वस्थचित्तः) नार्यायितः (पुरुषायितां वा) बहु महेश्वरनिधुवनां त्वां सर्वदा विचिन्त्य चिन्तयन् सन् यदि जपति, तर्हि सर्वसहातलक्रीडमानस्य ज्ञानिनः पाणिपद्मे निखिलसिद्धिप्रकराः वशगाः स्युरिति ॥ ११ ॥*

मूलप्रकृतेः सृष्टिस्थितिप्रलयकारणत्वात् रजःसत्त्वतमोगुणमूर्त्यादीनां कार्यत्वाच्च कार्यकारणयोरभेदं दर्शयति—प्रसूते संसारमिति । हे जननि! रजोगुणरूपेण भवती संसारं प्रसूते; प्रसवं करोति । सत्त्वगुणरूपेण जगतीं पालयति । वेति चार्थे । तमोगुणरूपेण समस्तब्रह्माण्डं, तत्कारणं क्षित्यादि च संहरति । अतः त्वं धाता; ब्रह्मापि । त्रिभुवनपतिः श्रीपतिः लक्ष्मीपतिरपि । महेशोऽपीति । प्रायः; विशेषेण ईशादि विभूतिरूपं, सामान्येन च सकलं कलया सह वर्तमानं नरादिजगद्वर्ति रूपमपि भवतीं किं स्तौमि? ॥ १२ ॥

*हरिहरविरिञ्चादयोऽपि त्वां स्तोतुमसमर्था इत्याह—प्रसूत इति । हे मातः! भवती भवं जनयति । यन्निखिलं वसुमत्यादि तदपि पाति च, संहारकाले वसुमत्यादि सर्वं भवती हरति । अतो जगत्स्रष्टा धाता, जगद्रक्षको रमापतिः, जगन्नाशकः शिवोऽपि प्रायः भवतीं साकल्येन स्तौति किम्? अत्र काक्वर्थेन देवत्रय्यपि त्वत्स्तवनेऽसमर्थेति सूचयति ॥ १२ ॥*

जगत्कारणत्वावच्छिन्नत्वेनापरिच्छिन्नपूर्णनित्यज्ञानं यतः कार्यतावच्छिन्नतया परिच्छिन्नापूर्णानित्यज्ञानसाधनं दूषयति—अनेक इति । हे मातः! भवत्या अधिकाः भवदधिकाः, भवदधिकाश्च ते गीर्वाणनिवहाश्च भवदधिकगीर्वाणनिवहाः, तान् भवदधिकगीर्वाणनिवहान् देवसमूहान्, अनेके; अज्ञानिनः सेवन्ते । विमूढाः; विशिष्टज्ञानहीनाः,

किमपि परमं विशेषतत्त्वं न हि जानन्ति। कथमित्याह—समेति। यतः त्रिलोक्यां प्रधानैः हरिहरविरिञ्चादिविबुधैः; विष्णुशिवब्रह्मादिदेवैः, समाराध्याम्; सम्यगाराध्याम्, आद्याम् सर्वेषामादिभूताम्, अतोऽहं स्वैरम् स्वच्छन्दं यथा स्यात्तथा, रतिरसमहानन्दनिरताम्; रतिरसेन नित्यक्रीडारसेन महानन्दनिरताम्। प्रपन्नोऽस्मि शरणं व्रजामि ॥ १३ ॥

*त्वद्व्यतिरिक्तदेवतोपासनाया निष्फलत्वमाह—अनेक इति। हे मातः! (यद्वा हे हरगृहिणि!) लोकाः निलिम्पयूथान् (यद्वा भवत्या अधिका देवा इति मत्वा निलिम्पयूथान्) भजन्ति, ते वैधेयाः परमार्थवस्तुभूतं त्वत्स्वरूपं किमपि न हि जानन्ति। अहं तु ब्रह्मविष्णुमहेश्वरप्रभृतिभिराराध्यमानां रतिरससंतोषतत्परां पूर्वां स्वच्छन्दतयैव शरणागतोऽस्मीति ॥ १३ ॥*

कार्यकारणभेदात् व्यष्टिरूपायाः परायाः प्रकृतेः स्तुतेरवकाशत्वं कथयति—धरित्रीति। हे कालि! त्वम् एका; अद्वैतरूपा; कल्याणी; सर्वमङ्गला, गिरिशरमणी; सदाशिवमनोहारिणी; धरित्री; पृथ्वीरूपा; त्वं कीलालम्; जलम्, त्वं शुचिरपि; अग्निरपि, त्वं समीरोऽपि; वायुरपि, गगनम्; आकाशस्त्वम्, सकलम्; तत्त्वसमूहोऽपि त्वम्। अतः ते तव का स्तुतिः? अधिकावधिकगुणकथनम्। हे मातः! तव करुणया, अगतिकं ज्ञानहीनं मामुद्दिश्य त्वं प्रसन्ना भूयाः प्रसन्ना भव। भवमनु; संसारं लक्ष्यीकृत्य, मम जनुः; जन्म न भूयात् ॥ १४ ॥

*प्रसन्नाया देव्या अनुग्रहेण पुनर्जन्माभावमाह—धरित्रीति। हे असिते! भद्रगुणशालिनी रुद्राणी त्वमेवाद्वितीया पृथिव्यप्तेजोवाय्वाकाशरूपासि किल! हे मातः! दृष्टान्तोपमादीनां त्वद्व्यतिरिक्तत्वाभावात् का त्वदीया स्तुतिः? अतः स्वकारुण्येन अनन्यगतिकं मां त्वं प्रसन्ना भूयाः; मम जननं पुनर्जन्माभावमनुभूयचेति भावः ॥ १४ ॥*

जगतः कर्ममूलकत्वात् महानीलकमलसाधने अधुनापि महत्फलं प्रदर्शयति—श्मशानस्थ इति। हे महाकालि! यो जनः श्मशानस्थः; शवानां शयनं श्मशानम् तत्रस्थः, स्वस्थः; सुखासीनः, गलितचिकुरः; मुक्तकेशः, दिक्पटधरः; दिगम्बरः, तव

ध्याननिरतः सन्, आकीर्णं सहस्रं कुसुमं; पुष्पं, निगलितवीर्येण युक्तं मनुं मन्त्रं जपन्, प्रत्येकं त्वत् तुभ्यं ददाति त्वदिति चतुर्थ्यर्थे पञ्चमी । अपि निश्चयेन । स्वैरं, स्वच्छन्दं, धरित्रीपरिबृढः; पृथ्वीपतिर्भवति ।। १५ ।।

*तान्त्रिकप्रयोगमाह—श्मशानस्थ इति । हे महाकालिके! महाश्मशानस्थो निश्चलान्तःकरणः कीर्णकेशः दिगम्बरः ते ध्यानासक्तः अर्कसमिधां सहस्रं स्वगलित-शुक्रेण युतं कुसुमं (लता कामलता स्वस्त्रीरजश्च) एतत्सर्वमेकीकृत्य मन्त्रमपि जपन् प्रत्येकं जुहोति, स भक्तः स्वेच्छयैव सकलपृथिवीनायको भवतीति स्तौति ।। १५ ।।*

महाचीनमहानीलसाधनाभ्यामुभाभ्यामैहिकामुष्मिकातिशयापूर्वं प्रपञ्चयति—गृहे इति । हे कालि! गृहे; योन्याश्लेषे, संमार्जन्याः; शिश्नस्य, परिगलितबीजं; रत्यवसान-गलितवीर्यम्, योनिशिश्नगलितबीजयुक्तं समूलं चिकुरं योनिशिश्नलोमविशेषशब्दसा-मान्यपरत्वम्। प्रेम्णा; भक्त्या, मनुं; मन्त्रं, समुच्चार्य, सकृदपि; एकवारमपि, कुजदिने; मङ्गलवासरे, मध्याह्ने; अहनशब्दस्य अहोरात्रिवाचकतया नीलसाधनस्य रात्रिकृततया च तद्दिवसीयसायंकाले चितायां वितरति । हि निश्चयेन, सततं निरन्तरं, क्षितिपरिबृढः; पृथिव्या अधिपः, सत्कविवरः; कवीनां श्रेष्ठः सन् गजारूढो याति ।। १६ ।।

*प्रकारान्तरेणाह—गृहे इति । हे कालि! गृहे संमार्जनं कर्म कर्त्र्याः अविच्छिन्नं परितः स्ववीर्यसक्तं केशं भक्त्या असकृत् मनुं पठित्वा, मध्याह्नकाले मङ्गलवासरे चितायां यः समर्पयति; स भक्तः पृथ्वीपालको नागारूढः सन् निरन्तरं महाकवि-प्रतीक्ष्यश्च भवति ।। १६ ।।*

गन्धर्वाख्यक्रमसाधनेन फलविशेषविधानं करोति—स्वपुष्पैरिति । यः; भक्तः, कुसुमधनुषः; कंदर्पस्य, मन्दिरम्; स्वपुष्पैः आकीर्णम्; रजोयुक्तम्, पुरोऽग्रे, ध्यायन् ध्यायन्; ध्यात्वा ध्यात्वा, यदि तव मनुं जपति, स गन्धर्वश्रेणीपतिरपि, अपिः-सकामे, गन्धर्वश्रेणीपतिः स्यात् । स कवित्वामृतनदीनदीनः; कवित्वरूपामृतप्रवाहनदीनः समुद्रः, गभीराशय इति यावत् । पर्यन्ते परमपदलीनः; परि सर्वतोभावेन, अन्ते अन्तकाले परमपदे लीनः, प्रभवति प्रकर्षेण लीनो भवतीत्यर्थः ।। १७ ।।

*पुनरपि प्रयोगान्तरेण फलं दर्शयति द्वाभ्याम्—स्वपुष्पैरिति । अहो इत्य-*

स्युत्कृष्टसंबोधने, यः साधकः, स्वरजोभिः पूर्णं मदनमन्दिरं पुरो ध्यात्वा ध्यात्वा, यदि तव परमं मनुं जपति, स साधको देवगायकपङ्क्तिनायक इव कवित्वपीयूषवाहिनी-वाहिनीनः ;

तथा च कालीतन्त्रे—

"कुलागारं पुष्पिताया ध्यात्वा यो जपते नरः ।
अयुतैकप्रमाणेन साधकः स्थिरमानसः ।
केवलं गुप्तभावेन स तु विद्यानिधिर्भवेत् ॥"

इत्युक्तदिशा स भक्तः विद्यानिधिर्भवति । अपि च ;

"संस्थाप्य वामभागे तु शक्तिं स्वामिपरायणम् ।
रक्तवस्त्रपरीधानां शिवमन्त्रधरां शुभाम् ॥
या शक्तिः सा महादेवी हररूपस्तु साधकः ।
अन्योन्यचिन्तनाद्देवि देवत्वमुपपद्यते ॥"

इति रुद्रयामलोक्तेः स्वस्त्रीविषय एवेदम्, "तयोरपि बिले बलात्" इति दक्षिणा-चारतन्त्रवाक्याच्च । अत्र निरुत्तरतन्त्रवचनं प्रमाणम्—

"दक्षवामकुलाचारा अन्योन्यं ते विरोधिनः ।
तस्मात्तैस्तैर्य आचारः सैव ग्राह्यो न चान्यथा ॥"

इति । अन्तकाले परमपदे श्रीमहाकालमहाकालीसारूप्यपदे लीनो भवतीति ॥ १७ ॥

पुनर्ध्यानभेदेन चीनसाधनभेदादुपचयाधिक्यं प्रतिपादयति—त्रिपञ्चारे पीठ इति । अयि जननि ! त्रिपञ्चारे ; पञ्चत्रिकोणात्मकयन्त्रे पीठे, शवशिवहृदि ; शवाकार-शिवहृदि, स्थितामिति शेषः । स्मेरवदनाम् ; ईषद्धास्यमुखीम्, उच्चैः ; अतिशयेन, मदनरसलावण्यनिरताम् ; महाकालेन सह शृङ्गाररसनिमग्नाम्, यो जनः भक्तः, स्वयमपि रतानन्दनिरतः समासक्तः ; अत्यन्तं निमग्नः सन्, नक्तम् ; रात्रौ, त्वां ध्यायेत्, स स्मरहरः ; शिव एव स्यात् ॥ १८ ॥

*त्रिपञ्चार इति । हे अम्ब ! त्रिपञ्चारे पीठे; पञ्चत्रिकोणात्मकयन्त्रे । तल्लक्षणमाह कालिकश्रुतौ, "त्रिकोणं नवकोणं पद्मम्" इति । अन्यच्च;*

*"आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् ।*
*ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम् ॥*
*ततो वृत्तं समालिख्य लिखेदष्टदलं ततः ।*
*वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम् ॥"*

*इति कालीतन्त्रोक्तेः, "मध्ये तु बैन्दवं चक्रं बीजं माया विभूषितम्" इति कुमारीकल्पवचनात्, "पञ्चशक्तिं समालिख्य अधोवक्त्रीं सुलक्षणाम्" इति नीलातन्त्रोक्तेश्च । एवंविधोक्ते पञ्चदशारे पीठ इत्यर्थः । अत्र शवरूपमहेश्वरवक्षसि महाकालेन सहोच्चकैः सुरतक्रीडासौन्दर्यासक्तां भक्तः स्वयमपि रात्रावत्यासक्तो रतिरसानन्दतत्परः सन् त्वां चिन्तयेत्, स भक्तः;*

*"जीवः शिवः शिवो जीवः स जीवः केवलः शिवः ।*
*पाशबद्धस्तथा जीवः पाशमुक्तः सदाशिवः ॥"*

*इति स्कन्दोपनिषदुक्तेः पाशाष्टकपरिच्छेदनेन स्मरहरः शिव एव भवति । किलेति प्रसिद्धयर्थे ॥ १८ ॥*

विहितबलिदानेन विविधफलं दर्शयन्नाह—सलोमास्थीति । अयि असिते! कालिके! अथ वा न सिता न बद्धा, सितं बन्धने, त्वया सर्वे बद्धाः, त्वां न कोऽपि बद्धुं शक्त इत्यर्थः । स्वैरम्; स्वच्छन्दं यथा स्यात्तथा; मार्जारं पललं मांसं सलोमास्थि; लोमास्थियुक्तम्, परं च औष्ट्रम्; उष्ट्रसंबन्धि, मेषं; मेषसंबन्धि, नरमहिषयोः पललं वा, छागस्य पललं वा, ते; तव पूजायां बलिं वितरतां, मर्त्यवसताम्; मर्त्यलोके वसतां साधूनाम्, प्रतिपदं; स्थाने स्थाने सर्वा अपूर्वा अचिन्तनीया सिद्धिः, प्रभवति प्रकर्षेण भवतीत्यर्थः ॥ १९ ॥

*वामदक्षिणमार्गव्यवस्थाक्रमेण बलिदानव्यवस्थामाह—सलोमास्थीति । हे कालि ! सकचकुल्यं बैडालं च क्रामेलकं छागं नृलुलाययोराजं वा मांसं तव पूजासमये*

*ये साधकाः बलिं समर्पयन्ति, तेषां मृत्युलोकनिवासिनां साधकानां प्रतिक्षणं समस्तसिद्धिनिकरो नवनवः प्रादुर्भवति । अत्र तन्त्रोक्तानि बलिदानप्रतिपादकानि वचनानि क्षत्रियपराणि । ब्राह्मणस्य साक्षात्पशुबलिदानं नास्ति । किं तु—*

*"ब्राह्मणस्य बलिर्यत्र तत्रायं विहितः क्रमः ।*
*कृत्वा घृतमयं सिंहं नरं व्याघ्रं च भैरव ॥*
*अथ वा पूपविकृतं यवक्षोदमयं च वा ।*
*घातयेच्चन्द्रहासेन येन मन्त्रेण संस्कृतम् ॥*
*अवश्यविहितं यत्र मद्यं तत्र द्विजः पुनः ।*
*नारिकेलजलं कांस्ये ताम्रे वा विसृजेन्मधु ॥*
*नापद्यपि द्विजो मद्यं कदाचिद्विसृजेदपि ।"*

*इति कालिकापुराणवचनात् ।*

*"पायसं तु गजत्वेन मार्जारत्वे कुलुत्थकम् ।*
*वृन्ताकं कुक्कुटत्वेन मेषत्वेन च तुम्बिकाम् ॥*
*माहिषत्वे मसूरान्नमुष्ट्रत्वेन च तुम्बिकाम् ।"*

*इति बृहत्तन्त्रराजोक्तेः ।*

*"वामदक्षिणमार्गौ हि कालीताराविधौ स्मृतः ।*
*द्राविडो दक्षिणः प्रोक्तो गौडो वामः प्रकीर्तितः ॥"*

*इति शक्तिसंगमतन्त्रवचनप्रामाण्याच्च बलिदाने वामदक्षिणमार्गव्यवस्था मुख्यत्वेनावलोकनीयेति भावः ॥ १९ ॥*

गुरुपारंपर्यभेदेन पुरश्चरणपरिपाटीं प्रतिपादयति—वशी लक्षमिति । हे मातः! वशी; जितेन्द्रियः, हविष्यान्नरतः दिवा युष्मच्चरणयुगलध्याननिपुणः लक्षं मन्त्रं प्रजपति । परम्; अपरम्, नक्तम्; रात्रौ, नग्नः; दिगम्बरः, निधुवनविनोदेन चरति, स्त्रीसङ्गहर्षेण तत्त्वेन पाठकालविधायकत्वेन च, सम्यक् अखण्डं मनुं लक्षं लक्षसंख्यं जपेत्, स क्षितितले; पृथिव्यां, स्मरहरसमानः; शिवतुल्यः स्यात् । किलेति प्रसिद्धौ ॥ २० ॥

*भोगव्यवस्थां रात्रिदिवभेदेन, द्विविधं पुरश्चरणं च दर्शयति—वशीति । हे मातः! हविष्यान्नभक्षणपरो नियतेन्द्रियो भक्तः, तव पादपङ्कजचिन्तनपरः सन्, दिवसे लक्षसंख्याकं मूलमन्त्रं जपति । च पुनः, रात्रौ नग्नः सन् सुरतक्रीडया लक्षसंख्यापरिमितं मन्त्रं द्रुतविलम्बादिदोषराहित्येन यो जपेत्, स पृथिव्यां शिवतुल्यैश्वर्यो भवेत् । तदुक्तम्—"भोगः स्वकीयकान्ताभिर्दक्षिणाचार इत्ययम्" इति दक्षिणाचारतन्त्रराजवचनाच्चेति भावः ॥ २० ॥*

मन्त्रोद्धारसहितत्वेन पाठकाले विधायकत्वेन च महाकवित्वफलमुपपादयति—**इदं स्तोत्रमिति** । हे मातः! यः; भक्तः, इदं तव स्वरूपाख्यम्; स्वरूपकथनं स्तोत्रम्, निशार्धम्; निशीथम्, अथ वा पूजाकाले पठति । तुरवधारणे, तस्य आलापोऽपि; अनर्थकवचनमपि, कवित्वामृतरसः सन् प्रसरति । तव मनुसमुद्धारणजनुः, तव मनूनां मन्त्राणां समुद्धरणस्य जनुः जन्म स्थानम्, पादम्बुजयुगलपूजाविधियुतम्; पादाम्बुजयुगलस्य पूजाया विधिः, तेन युतमित्यर्थः ॥ २१ ॥

*स्तोत्रस्यास्य पठनफलमाह—इदमिति । हेमातः! इदम्; त्वदीयद्वाविंशत्यक्षरात्मकमूलमन्त्रप्रादुर्भावं चरणकमलयुगलनमस्यासहितं स्वरूपाख्यं स्तोत्रम् । अत्र पूजाशब्देन ध्यानं लक्ष्यते; पूजायाः कुत्राप्यनुक्तत्वात् । निशीथकाले, अथ वा पूजासमये यः पठति, तस्य अननुसंधानेन यत्किंचिद् भाषणमपि कवित्वपीयूषसरिद्रूपैव प्रसरतीति भावः ॥ २१ ॥*

अनेन स्वरूपाख्यस्तोत्रपाठेनेहामुत्र च भोगमोक्षौ मनोऽभिलषितं फलं च लभत इत्याह—**कुरङ्गाक्षीबृन्दमिति** । तम्; स्तोत्रपाठम्, प्रेम्णा तरलं; चञ्चलम्, कुरङ्गाक्षीबृन्दम्; स्त्रीसमूहः, अनुसरति अनुगच्छति । कुबेरप्रतिनिधिः; कुबेरतुल्यः, क्षोणीपतिरपि तस्य वशः; वशवर्ती । तस्य रिपुः कारागारं कलयति गच्छति । तत्तस्य केलिकलया; लीलाविनोदेन, स्वेच्छयेति यावत् । चिरं जीवन्मुक्तः; चिरं चिरकालम्, जीवन् सन् मुक्तः कैवल्यं प्राप्नोति । स यदि मुक्तिं नेच्छति, तर्हि प्रतिजनुः जन्मनि जन्मनि, भक्तश्च प्रभवति प्रकर्षेण भवतीत्यर्थः ॥ २२ ॥

सर्वगुणायाः सकलगुणकथनात्स्वरूपाख्यं स्तोत्रमुपसंहरति—**इति महाकालविरचितमिति** ।

**इति श्रीकर्पूरस्तवराजस्य व्याख्या रहस्यार्थसाधिका समाप्ता**

सामान्येन देव्या नामकीर्तनादेव बन्धकत्वनिवृत्तिः, किमु साधकतयेति फल-श्रुतिमाह—कुरङ्गाक्षीति । प्रेमचपलं सुन्दरीयूथं तं साधकमनुसरति च, कुबेरतुल्यः सकलसर्वेसहानायकः तस्य आज्ञाकारी भवति । तस्य क्रीडालेशेनाहितोऽपि बन्दि-गृहं सेवते । "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते" इति स्मृतेः । स साधकः प्रतिजन्म चिरं जीवन् सन् देवताप्रसादाधिगतपरमार्थज्ञानेन मुक्तपाशाष्टकतया मुक्तो भवति ।

"कलौ काली महाविद्या कलौ काली तु सिद्धिदा ।
कलौ काली सुसिद्धा च कलौ काली वरप्रदा ॥
कलौ काली विहायाथ यः कश्चित्सिद्धिकामुकः ।
स तु शक्तिं विना देवि रतिसंभोगमिच्छति ॥"

इति महाकालसंहिता वचनात् । तथान्यत्र,

"युगादिसमये देवि शिवं परगुणोत्तरम् ।
तदिच्छानिर्गुणं शान्तं सच्चिदानन्दविग्रहम् ॥
शाश्वतं सुन्दरं शुभ्रं सर्वदेवयुतं वरम् ।
आदिनाथं गुणातीतं काल्यासंयुतमीश्वरम् ॥
विपरीतरतं देवं सामरस्यपरायणम् ।"

इत्यादि ।

"ब्राह्मणेन तथा कार्यं ब्राह्मण्यं न विनश्यति ।
ब्राह्मणो मदिरां दृष्ट्वा ब्राह्मण्यादेव हीयते ॥
प्राणावरं प्रयच्छन्तु ब्राह्मणो नार्चयेत्सुराम् ।"

इति शक्तिसंगमतन्त्रोक्तेः ।

"यो दाक्षिण्यं विना विप्रो महाकालीं प्रपूजयेत् ।
स पापी स्वर्गलोकात्तु च्युतो भवति रोगधृक् ॥

*विप्रो यः पूजको वामः सोऽन्यायी पुण्यवर्जितः ।"*

इति कालिकापुराणत् ।

*"स्वपन् तिष्ठन् व्रजन्मार्गे प्रलपन् भोजने रतः ।*
*कीर्तयेत्सततं देवीं स वै मुच्येत बन्धनात् ॥"*

इति पद्मपुराणावचनाच्च देव्युपासनाया महामहिमातिशयं प्रदर्शितमिति शिवम् ॥२२॥

**इति श्रीकर्पूरस्तवराजटीका सुबोधिनी समाप्ता**

कर्पूरस्तवराजीयव्याख्यानयुगलं मुदा ।
त्वदीयचरणाम्भोजे जगदम्ब समर्पये ॥

## APPENDIX II

# श्लोकार्धानामनुक्रमः


| | पुटसंख्या | | पुटसंख्या |
|---|---|---|---|
| अतस्त्वां धातासि | ११७ | प्रत्येकं वा द्वयं वा | १०९ |
| अनेके सेवन्ते | ११८ | प्रविष्टां संतुष्टाम् | ११२ |
| इदं स्तोत्रं मात: | १२९ | प्रसूते संसारं | ११७ |
| ईशानः सेन्दुवाम० | १०१ | बलिं ते पूजायाम् | १२७ |
| ईशो वैश्वानरस्थ: | १०३ | मातर्ये ये जपन्ति | १०६ |
| ऊर्ध्वे वामे कृपाणं | १०५ | रिपुः कारागारं | १३० |
| कर्पूरं मध्यमान्त्य० | ९७ | वदामस्ते किं वा | ११३ |
| कुरङ्गाक्षीवृन्दं | १३० | वर्गाद्यं वह्निसंस्थं | १०६ |
| गतासूनां बाहु० | ११० | वशी लक्षं मन्त्रं | १२८ |
| गृहे संमार्जन्या | १२२ | विवासास्त्वां ध्यायन् | ११५ |
| जपंस्त्वत्प्रत्येकं | १२० | शिवाभिर्घोराभि: | ११२ |
| जप्त्वैतन्नाम ये वा | १०५ | श्मशानस्थ: सुस्थ: | १२० |
| जित्वा वाचामधीशं | १०१ | श्मशानस्थे तल्पे | ११० |
| तथापि त्वद्भक्ति: | ११३ | स गन्धर्वश्रेणी० | १२३ |
| तदा तस्य क्षोणीतल० | ११६ | समन्तादापीन० | ११५ |
| तेषां गद्यानि पद्यानि | ९७ | सलोमास्थि स्वैरं | १२७ |
| तेषां नेत्रारविन्दे | १०९ | समा: सुस्थीभूत: | ११६ |
| त्रिपञ्चारे पीठे | १२५ | समाराध्यामाद्यां | ११८ |
| द्वेष्टारं घ्नन्ति ते च | १०३ | समासक्तो नक्तं | १२५ |
| धरित्री कीलालं | ११९ | समुच्चार्य प्रेम्णा | १२२ |
| निशार्धे वा पूजा० | १२९ | स्तुतिः का ते मातः | ११९ |
| परं नक्तं नग्न: | १२८ | स्वपुष्पैराकीर्णे | १२३ |

# APPENDIX III

## संज्ञाविवृतिः

अ॰ रा॰
अन्न॰ क॰
अमरः
अर्ग॰ स्तो॰
असिता॰
कठ॰ उ॰
क॰ र॰
काम॰ त॰
कामा॰ त॰
का॰ क्र॰
का॰ उ॰
का॰ त॰
का॰ पु॰
काली॰ स॰
का॰ श्रु॰
का॰ हृ॰
कुब्जि॰ त॰
कुमा॰ क॰
कुल॰ त॰
कूर्म॰
कैवल्य॰
कौला॰ त॰

क्रम॰
गन्ध॰ त॰
गन्ध॰ मा॰ त॰
गा॰ त॰
गुप्ता॰ त॰
गोर॰ सं॰
घेर॰ सं॰
छा॰ उ॰
ज्ञानसं॰ त॰
तन्त्र॰
तन्त्राभि॰
तारा॰ क॰
तारा॰ र॰
तोड॰ त॰
त्रिपुटा॰
त्रिपु॰ स॰
द॰ त॰
दे॰ गी॰
दे॰ मा॰
दे॰ सू॰
निरु॰ त॰
नि॰ त॰

नीला॰ त॰
पद्म॰
पात॰ सू॰
प्राण॰ उ॰
फेट्॰ त॰
बृह॰ त॰
बृह॰ रा॰
ब्रह्म॰ उ॰
ब्र॰ बि॰ उ॰
भ॰ गी॰
भूत॰ त॰
भै॰ त॰
महा॰ सं॰
महा॰ स्तो॰
महा॰ नि॰ त॰
मातृ॰ त॰
मार्क॰ पु॰
महो॰
मुण्ड॰ उ॰
मे॰ को॰
याज्ञ॰ सं॰
याम॰

यो॰ वा॰
योगि॰ त॰
रा॰ त॰
रुद्र॰
वर्णा॰
वासि॰ रा॰
वि॰ चू॰
विशु॰ त॰
विश्व॰ त॰
वि॰ या॰
शक्ति॰ त॰
शाक्त॰
शाक्त॰ त॰
शार॰ ति॰
शि॰ गी॰
शि॰ ध॰
शि॰ सं॰
शि॰ च॰
श्या॰ क॰
श्या॰ र॰
स॰ स्तो॰
स्तो॰

## APPENDIX IV

# व्याख्यानोदाहृतप्रमाणग्रन्थानामनुक्रमः


पुटसंख्या

अद्भुतरामायणम् १०३
अन्नदाकल्पः १२८
अमरः, १२८
अर्गलास्तोत्रम् ११९
असितास्तोत्रम् १०३
कठोपनिषत् १०२
ककारकूटारहस्यम् १२२
कामधेनुतन्त्रम् ११०
कामाख्यातन्त्रम् १०४, १४२
कालिकापुराणम् १४४, १४६, १४७
कालिकाश्रुतिः ९७, १०९, १४३
कालिकोपनिषत् १०१, १०८
कालीकुलसर्वस्वम् १०७, १३०
कालीक्रमः ११५
कालीतन्त्रम् १२५, १४२, १४३
कालीहृदयम् ९७
कुब्जिकातन्त्रम् ११५
कुमारीकल्पः १४३
कुलार्णवम् ११६, १२२, १२४,, १२५, १२९, १३०, १३७, १३८
कूर्मपुराणम् ११८, ११९
कैवल्योपनिषत् १००
कौलावलीतन्त्रम् ११७

पुटसंख्या

क्रमस्तोत्रम् ९९, १०१, १०२, १०५, १०८
गन्धर्वतन्त्रम् ९७, १०२, ११२, ११३, १२६, १२७
गन्धर्वमालिकातन्त्रम् १२२
गायत्रीतन्त्रम् ११२
गुप्तार्णवतन्त्रम् ११९
गोरक्षसंहिता ११६
घेरण्डसंहिता ११६, १२६
छान्दोग्योपनिषत् १२०
ज्ञानसंकलिनीतन्त्रम् १००, १२१
तन्त्रकल्पद्रुमः १००, ११६, १२३, १२८
तन्त्रान्तरम् १०५
तन्त्राभिधानम् १०२, १०३, १०७
ताराकल्पः १०५, ११६
तारारहस्यम् ९८, १०२, १२१, १२४
तोडलतन्त्रम् १००
त्रिपुटास्तोत्रम् ११८
त्रिपुरासारसमुच्चयः १००
दक्षिणाचारतन्त्रराजम् १४२, १४५
देवीगीता १०१, १०४, ११०, १११, १२५
देवीमाहात्म्यम् ९७, १०८, ११३, ११४, १२०, १२७
देवीसूक्तम् ११४, १२०
निरुत्तरतन्त्रम् ९८, ११३, ११५, १४२

| | पुटसंख्या | | पुटसंख्या |
|---|---|---|---|
| निर्वाणतन्त्रम् | १०४, १०८, ११३ | योगवासिष्ठम् | १०० |
| नीलातन्त्रम् | १४३ | योगिनीतन्त्रम् | १०५, १०६, १०८, ११९ |
| पद्मपुराणम् | १४७ | राधातन्त्रम् | ११० |
| पातञ्जलसूत्रम् | १२३ | रुद्रयामलम् | १२१, १४३ |
| प्राणाग्निहोत्रोपनिषत् | १२२ | वर्णाभिधानम् | १०७ |
| फेट्कारिणीतन्त्रम् | ११५ | वासिष्ठरामायणम् | ११३ |
| बृहत्तन्त्रराजम् | १४४ | विवेकचूडामणिः | १०२ |
| बृहन्नीलतन्त्रम् | १०४, १२८ | विशुद्धेश्वरतन्त्रम् | १३० |
| ब्रह्मबिन्दूपनिषत् | १०० | विश्वसारतन्त्रम् | १०१, ११० |
| ब्रह्मोपनिषत् | १०२ | विष्णुयामलम् | ११४ |
| भगवद्गीता | ११५, १२६, १४६ | शक्तिसङ्गमतन्त्रम् | १४४ |
| भूतशुद्धितन्त्रम् | १०९, १२४ | शाक्तागमः | १२४ |
| भैरवतन्त्रम् | १०८, ११० | शाक्तानन्दतरङ्गिणी | १०७, १४४ |
| महाकालसंहिता | ९९, ११३, १२०, १३८, १४६ | शारदातिलकम् | ११२ |
| महाकालीस्तोत्रम् | ११४ | शिवगीता | १२८ |
| महानिर्वाणतन्त्रम् | १०२, १११, ११३, १२१ | शिवधर्मोत्तरम् | १०६ |
| महोपनिषत् | १२२ | शिवसंहिता | १२४, १२५ |
| मातृकाभेदतन्त्रम् | १२३ | शिवार्चनचन्द्रिका | १२९ |
| मार्कण्डेयपुराणम् | १०६ | श्यामाकवचम् | १०८ |
| मुण्डकोपनिषत् | १०४ | श्यामारहस्यम् | १२७ |
| मेदिनीकोशः | १२८ | सहस्रनामस्तोत्रम् | १०८ |
| याज्ञवल्क्यसंहिता | १२१ | स्कन्दोपनिषत् | १४३ |
| यामलम् | १०२ | स्तोत्रान्तरम् | ११८ |

# APPENDIX V

## व्याख्यानोदाहृतप्रमाणवाक्यानामनुक्रमः

### अ


अकारः सात्त्विको ज्ञेयः, १०० ज्ञान० सं० त० ९८
अकारादिक्षकारान्ता, ११०, रा० त०
अङ्गुष्ठमात्र: पुरुषः, १०२, कठ० उ० ४-१३
अचिन्त्यामिताकार० ११३, महा० सं०
अणिमा महिमा चैव, १०६, मार्क० पु० ४०-२९
अत: सा दक्षिणा काली, १०४, नि० त०
अतो हि दक्षिणा काली, १०४, काम० त०
अथ वक्ष्ये महेशानि, ९८, निरु० त०
अथ वाद्वैतभावेन, १२७, गन्ध० त०
अथ वा पूपविकृतं, १४४, का० पु०
अथ वा मुक्तकेशश्च, ११५, फेट्० त०
अथ सर्वा विद्यां प्रथमम्, १०९ का० श्रु०
अथ हैनां ब्रह्मरन्ध्रे, ९८, १३५ ,, ,,
अद्वैतभावसंपन्न:० १२७, गन्ध० त०
अधः कृत्वा तु पुरुषं, ११३, १२६, गन्ध० त०
अनन्तं प्रकृतौ लीनं, ११८, कूर्म० १२
अनन्तमक्षरं ब्रह्म, ११८, ,, ,,
अनाद्यविद्यानिर्वाच्या, १२६, गन्ध० त०
अन्ते पदं क्षिप्य विभा० १०८, क्रम०
अन्ते वह्निवधूं दद्यात्, ९८, निरु० त०
अन्योन्यचिन्तनाद्देवि, १४२, का० त०
अपञ्चीकृतभूतोत्थं, १२६, गन्ध० त०
अभिषेककृतो मन्त्री, ११५ निरु० त०
अभेदमतमास्थाय, ९८, तारा० त० १
अभेदेन विलीनाः स्युः, १११, दे० गी० १-६
अभ्यासाज्जायते सिद्धिः, १२५, शिव० सं० ४-९
अमा स्यान्निर्गुणे सापि, ११३, निरु० त०
अमृतं जायते देवि, १२२, गन्ध० मा० त०
अमृतत्वाल्ललाटेऽस्याः,१०२,महा०नि०त०१३-७
अयुतैकप्रमाणेन, १४२, का० त०
अवश्यविहितं यत्र, १४४, का० पु०
अव्यक्तं कारणो देहः, १०१, दे० गी० १-३१
अव्यया अपरिच्छिन्ना, ११०, रा० त०
अस्थिलोमत्वचा युक्तं, १२७, श्या० र०
अस्य ग्रहणमात्रेण, १०८, नि० त०
अस्वभावात्मता सर्गः, ११३, वासि० रा०
अहंकार इतीयं मे, १२६, भ० गी० ७-४


### आ


आकारो विजयानन्तौ, १०३, तन्त्राभि० ९
आत्मदेहं स्वेष्टरूपं १०८, योगि० त० ६-६
आत्मनो देहमध्ये तु, ११०, विश्व० त०
आत्मन्येव यजेद्देवीम्, १२७, गन्ध० त०
आत्मा चैवासि मातः, ११९, गुप्ता० त०
आत्मानं कालिकात्मानं, १०८, स० स्तो०
आत्माभेदेन संचिन्त्य, १२७, गन्ध० त०
आत्मोपलब्धिविषयं, ११८, कूर्म० अ० १२

आदिनाथं गुणातीतं, १४६
आदौ त्रिकोणं विन्यस्य, १२५, १४३, का० त०
आद्यन्तहीनं जगदात्मरूपं, १०४, असिता० २६-२९
आद्याप्यशेषजगतां, १२२, शार० ति० १४-९१
आधारमानन्दमखण्ड०, १००, कैवल्य० १-१५
आनन्दपुष्पं दातव्यं, १२१, तारा० र० २
आनन्दमयःसंभूय, ११६, १२६, घेर०सं० ७-१२
आश्रित्य प्रजपेन्मन्त्रं, १२१, रुद्र०

इ

इःसूक्ष्मा शाल्मली विद्या, १०३, तन्त्राभि० १२
इडायां चन्द्रमा ज्ञेयः, १२१, याज्ञ० सं०
इयं नारायणी काली, १०४, बृह० त०

ई

ईकारः कारणात्मासौ, १०४, दे० गी० ३-४२
ईशानो भूतभव्यस्य, १०२, कठ० उ० ४-१३
ईस्त्रिमूर्तिमहामाया, १०७, तन्त्राभि० १४

उ

उत्तमा सहजावस्था, १२२, कुल० त०
उत्पत्तिस्थितिसंहृतीः, ११८, स्तोत्र०
उत्पन्नशक्तिबोधस्य, १२२, महो० ४-७५
उपाधित्रितयादन्यत्, १२६, गन्ध० त०
उभयोर्निष्कलं देवि, १३०, विशु० त०
उद्धृत्य महिषस्यापि, १२७, श्या० र०

ऊ

ऊकारो भैरवः सूक्ष्मः, १०२, तन्त्राभि० २२

ए

एकं सर्वगतं सूक्ष्मं, ११८, कूर्म० १२
एकत्रोच्चारणाद्देवि, १००, तोड० त०
एकाक्षरी सिद्धविद्या, ९८, निरु० त०
एकानेका सूक्ष्मरूपा०, ११४, १२०, दे० सू०
एवमीशोऽपि संप्रोक्तः, ११०, दे० गी० १-४८

क

कः क्रोधीशो महाकाली, १०३, तन्त्राभि० ५६
ककारं धर्मदं देवि, १००, तोड० त०
ककारोज्ज्वलरूपत्वात्, १००, तन्त्र०
कर्मणा जायते जन्तुः, १११, महा० नि० त०
कलौ काली महाविद्या, १४६, महा० सं०
कलौ काली सुसिद्धा च, ,, ,,
कलौ कालीं विहायाथ, ,, ,,
कामक्रोधौ छागबाहौ, १२८, अज्ञ० क०
कामरूपां कलातीतां, ९७, का० हृ०
कामाकामकृतं छित्वा, १०६, शि० ध०
कारितास्ते यतोऽतस्त्वां, ११४, दे० मा० १-८४
कालिका तनुतामेति, १२२, महो० ४-११५
कालिका द्विविधा प्रोक्ता, १०५
कालीं कालहरां देवीं, ९७ का० हृ०
कालीनाम्ना पलायेत, १०४, नि० त०
काल्यादिस्थूलं यद्रूपं, ११४ वि० या०
कीर्तयेत्सततं देवीं, १४५, पद्म०
कुजवारे मध्यरात्रे, १२२, क० र०
कुलं शीलं तथा जातिः, १३८ कु० त० १५-९०
कुलागारं पुष्पितायाः, १४२, का० त०
कुलाचारं विना देवि, ११५ निरु० त०
कूटस्थमव्यक्तवपुः, १०४, असिता० २६-२९
कृत्वा घृतमयं सिंहं, १४४, का० पु०
कृष्णा तु दक्षिणा प्रोक्ता, १०५
केवलं गुप्तभावेन, १४२, का० त०
केवल्यं चेति तां विद्धि, १२८, शि० गी० १२-३
कोऽहं विष्णुः कोऽपरो वा, ११४ दे० सू०
कोटिसौदामिनीभासां, १२१, रुद्र०
क्रींकारो मस्तकं देवि, १०७, शाक्त० त०
क्षणं ब्रह्माहमस्मीति, १०८, यो० त० ६-६६

क्षितिस्त्वं विधाता, ११८, त्रिपुटा० १५
क्षुधां देहव्यथां त्यक्त्वा, १०२, वि० चू० ५३८

ग

गद्यपद्यमयी वाणी, १३०, काली० स०
गुणातीतनिर्द्वन्द्व० ११३ महा० सं०
गानात्परतरं न हि, १२९

घ

घातयेच्चन्द्रहासेन, १४४, का० पु०
घृणा लज्जा भयं शङ्का, १३८ कु० त० १३-९०

च

चतुर्भुजे चतुर्वक्त्र० ११९, अर्ग० स्तो० १५
चितिरूपेण या कृत्स्नम्, ११३, दे० मा० ५-३४
चित्तं प्रकल्पयेत्पुष्पं, १२१, महा० त० १५-१४४
चिद्रूपां ज्ञाननिलयां, १२१, रुद्र०
चिन्तयित्वा तदाकारं, ११९, १२४, भूत० त०

ज

जपध्यानसमायुक्तः, ११७, कौला० त०
जपस्तुतिः स्यादधमा, १२२, कुल० त०
जपस्यादौ शिवां ध्यायेत्, ११७, कौला० त०
जीवः शिवो शिवो जीवः, १४३ स्कन्द० ६
जीवेन सहितां शक्तिं, ११६, गोर० सं०
ज्वलनार्णसमायोगात्, १००, तन्त्र०
ज्ञात्वैव मुक्तिमाप्नोति, १२५, का० त०
ज्ञानदानक्षमापुष्पम्, १२१, तारा० त०
ज्ञानमेव प्रपश्यन्ती, ११९, कूर्म० १२
ज्ञानेनैकेन तल्लभ्यं, ११९, ,, ,,

त

तच्छुभ्रं ज्योतिषां ज्योतिः, १०४, मुण्ड० उ० २-१०
तच्छोणितं महेशानि, १२३, मातृ० त०
ततः सा दक्षिणा नाम्ना, १०४, कामा० त०
ततः स्वनाम्नः शृणु मातः, १०८ क्रम०
ततोऽपि लज्जाद्वय० १०८ क्रम०
ततो वृत्तं समालिख्य, १४३, का० त०
ततो वै विलिखेन्मन्त्री, १२५, १४३, का० त०
तत्पदार्थानुसंधानं, १२४, कुल० त० १५-११५
तत्र सूर्योऽग्निर्नाम, १२२, प्राण० उ० १९
तत्रस्थसूर्यपात्रात्, १२१, तारा० त० २
तथा मन्त्रात्मकं चक्रं, १२६, गन्ध० त०
तथा मुक्तिरसौ देवि, १०४, काम० त०
तथा कामावशायित्वं, १०६, मार्कं० पु० ४०-३०
तथा समाधियोगेन, १३७, कु० त० ९-१६
तथैव विद्वान् रमते, १०२, वि० चू० ५३८
तदा कारणीभूतसर्वेक० ११४ महा० स्तो०
तदाक्रम्य स्वयं देवी, १२६
तदिच्छानिर्गुणं शान्तं, १४५
तदुद्भवामृतं देवि, १२२, गन्ध० मा० त०
तदेव निर्गुणं ध्यानं, १२९, शि० च०
तदेव मातस्तव पाद० १०१, क्रम०
तदेव तस्य चिन्मात्रे, १२५, दे० गी० ६-२७
तद्रूपं परमानन्दं, १२६
तन्निष्ठस्तद्गतप्राणः, १२४, कुल० त० १५-११४
तन्मयीं परमानन्द० १०२, गन्ध० त०
तया पिहितमात्मानम्, १२४, शि० सं० ४-२
तयोरपि बिलेबलात्, १४२ द० त०
तस्माच्छतगुणं प्रोक्तं, ११७, कौला० त०
तस्मात्तैस्तैर्य आचारः, १४२ निरु० त०
तस्माद् ज्ञानासिना तूर्णम्, १०६, शि० च०
तस्मै दद्यात्फलं देवी, १०८ यो० त० ६-६६
तस्मिन्नाधारपाथोजे, १२४, शि० सं० २-२२
तस्यां कर्माणि जीवानां, १११, दे० गी० १-६
तस्या देव्यास्तु तद्रूपं, ११९, यो० त०
तस्योपरि महेशानि, ११२, गन्ध० त०

तस्योर्ध्वे तु शिखा सूक्ष्मा, १२४, शि० सं० ४-२
तादात्म्यरूपं चित्संवित्, १०१, दे० गी० १-२
तारकत्वात्सदा तारा, १०२, तारा० त० १-२
तेनामृतेन देवेशि, गन्ध० मा० त०
त्रिकोणं नव कोणं पद्मम्, १४३ का० उ०
त्रिकोणा वर्तते योनिः, १२४, शि० सं० २-२२
त्रिगुणा च कूर्चयुग्मं, ९८, निरु० त०
त्रिलोके स तु पूज्यः स्यात्, ९८, तारा० त०
त्वं भूमिस्त्वं जलौघः, ११९, गुप्त० त० १
त्वदीयकूर्चद्वयजापकत्वात्, १०२, क्रम०
त्वदीयबीजत्रयमेतत्, १०१, क्रम०
त्वदीयलज्जाद्वयजापकत्वात्, १०५, क्रम०
त्वमग्निस्तु रुद्रो जगत्, ११८, त्रिपुटा० १५

द

दक्षवामकुलाचारा, १४२, निरु० त०
दक्षिणस्यां दिशि स्थाने, १०४, नि० त०
दक्षिणे कालिके चेति, ९८, निरु० त०
दन्तुरां परमां नित्यां १०५, योगि० त० १
दयाज्ञानक्षमापुष्पं, १२१, तारा० त० २
दयासमुद्रस्य वरप्रसादात्, १०५, क्रम०
दशपुष्पं यः प्रदद्यात्, १२१, तारा० त० २
दिगम्बरः सहस्रं च, १२०, महा० सं०
दिव्यो वाप्यथवा वीरः, ११५ का० क०
दीर्घकारेण देवेशि, १००, तन्त्र०
दुर्गं च दुर्गतिं जित्वा, १०७, काली० स०
देहे विनष्टे तत्कर्म, १११, महा० नि० त०
द्राविडोदक्षिणः प्रोक्तः, १४४, शक्ति० त०
द्विठः स्वाहानलप्रिया, १०७ वर्णा०

ध

धर्माधर्महविर्दीप्ता, १२८, बृह० त०
ध्यात्वाभ्यर्च्य महा भक्त्या, १२०, महा० सं०
ध्यानेन लभते सर्वं, १०८ नि० त०
ध्यायेत्कुण्डलिनीं देवीं, ११६, तन्त्र०

न

नक्तं निधुवनासक्तः, १२८, तन्त्र०
नखं केशं स्ववीर्यं च, १२२ क० र०
न चापन्न शोको न रोगः, १३०, महा० स०
न तस्य निष्कृतिर्देवि, ९९, तारा० त० १
नवाम्भोदश्यामां, १०५, तारा० क०
नश्यन्ति दहने दीप्ते, १३०, काली० स०
नानासुखं विहारं च, ११६, गौर० सं०
नारायणेऽपि यद्दृत्वा, १०८ श्या० क०
नारिकेलजलं कांस्ये, १४४, का० पु०
नापद्यपि द्विजो नित्यं, १४४ ,,
निजदेहाख्ययन्त्रं तु, १२६, गन्ध० त०
नित्यायाः कालरूपायाः, १०२, महा० नि० त० १३-७
निर्द्वन्द्वः स्थिरधीर्मौनी, ११६, कुल० त० १५-१११
निर्लेपं निर्गुणं शुद्धं, १२७, गन्ध० त०

प

पञ्चप्राणमनोबुद्धिः १२६, गन्ध० त०
पञ्चशक्तिं समालिख्य, १४३, नीला०
पञ्चाशद्वर्णमुण्डाली, ११०, निरु० त०
पठेन्नामसहस्रं यः, १२२ क० र०
परमानन्दकं रूपं, ११९, यो० त०
परानन्दमयं ब्रह्म, ११०, विश्व० त०
परशक्त्यात्ममिथुन०, १२९, कुल० त० ५-११२
परात्परतरं तत्त्वं, ११८, कूर्म० अ, १२
पशुभावरता ये च, ११५ कुब्जि० त०
पाद्यं चरणयोर्दद्यात्, १२१, महा० नि० १५-१४३
पापपुण्यपशुं हत्वा, १०६, योगि० त० ६-७२
पायसं तु गजत्वेन, १४४, बृह० रा०
पाशबद्धः पशुः प्रोक्तः, १३८, कु० त० १३-९१
पाशबद्धस्तथा जीवः, १४३, स्कन्द० ७
पीत्वा कुलरसं वीरः, ११९, योगि० त० ६-६१

पुनस्तथा कूर्चयुगं, १०८ क्रम०
पुरत्रये क्रीडति यश्च, १००, कैवल्य० १-१४
पुरुषो दक्षिण: प्रोक्त:, १०४, कामा० त०
पौत्रान्तं स्थैर्यमास्थाय, ११०, भै० त०
प्रज्ञाश्रियौ चापि, १०२, क्रम०
प्रणमामि महादेवीं, ९७ गन्ध० त०
प्रथमो व्यष्टिरूपस्तु, ११०, दे० गी० १-४९
प्राकाम्यं च तथेशित्वं, १०६, मार्क० पु० ४०-२९
प्राज्ञस्तु कारणात्मा स्यात्, ११०, दे० गी० १-४७
प्राणावरं प्रयच्छन्तु, १४६, शक्ति त०
प्राप्तोत्यष्टौ नरव्याघ्र, १०६, मार्क० पु० ४०-३०

ब

बद्धार्जुनौ सितौ, १२८, अमरः ३-८०
बहिर्वृत्तेन संयुक्तं, १२५, का० त०
बहूनां जन्मनामन्ते, १४६, भ० गी० ७-१९
बिन्दूनां निष्कलत्वाच्च, १००, तन्त्र०
बीजत्रयं वै पुनरप्युपास्य, १०८
ब्रह्मध्यानं महेशानि, ११९, योगि० त० ६-६२
ब्रह्मरन्ध्रचन्द्रपात्रात्, १२१, तारा० त० २
ब्रह्मयोनिगतं ध्यात्वा, १२४, शि० सं० ४-२
ब्रह्माण्डं च तथा सर्वं, १०८, यो० त० ६७
ब्रह्मानलयुतं देवि, ९८, निरु० त०
ब्राह्मणस्य बलिर्यत्र, १४४, का० पु०
ब्राह्मणेन तथा कार्यं, १४६, शक्ति० त०
ब्राह्मणो मदिरां दृष्ट्वा, ,, ,,

भ

भवेत्त्रिभुवनं कम्पे, १२८, मेदिनी,
भूमिरापोऽनलो वायुः, १२६, भ० गी० ७-४
भेदं कृत्वा यदा मन्त्री, ९९, तारा० त० १
भोगः स्वकीयकान्ताभिः, १४५, द० त०

म

मकारस्तामसः प्रोक्तः, १००, ज्ञान० सं० त० ९८
मध्ये तु बैन्दवं चक्रं, १२५, १४३, का० त०
मनसा पठितं स्तोत्रं, १३०, विशु० त०
मनसा मन्त्रवर्णस्य, ११७, कौला० त०
मन्त्रार्थं मन्त्रचैतन्यं, १२४, कु० त० १५-५९
महाकालो महेश्वरः, १३३, श्रुतिः
मम कण्ठे स्थितं बीजं, ११०, काम० त०
महाकालरुद्रोदित० १३०, महा० सं०
महानिशायां ब्राह्मे वा, १२६
महान्त्यपि च भूतानि, १११
महामहाब्रह्मविद्या, १०७, ११९, यो० त० २-४
मातस्त्वत्परमं रूपं, ११४, वि० या०
मातेव दक्षिणा तस्य, १२७, श्या० र०
माया कर्मादिसहिता, १११, दे० गी० २-३
माया लज्जा च ह्रींकारः, १०५
माहिषत्वे मसूराणाम्, १४४, बृह० रा०
मुक्तकेशो दिशावासाः, १२२, क० र०
मेघाङ्गी विगताम्बरा, १२०
मोक्षे साक्षाद्पेताम्बुद०, १००, त्रिपु० स० ६-२६

य

य आस्ते मैथुनं तत्स्थात्, १२९, कुल० त० ५-११२
यज्जीवब्रह्मणोरैक्यं, १२९, शि० च०
यत्तु मे निष्कलं रूपं, ११९, कूर्म० १२
यथा कर्मसमासौ च, १०४, कामा० त०
यथा काली तथा तारा, ९८, तारा० त० १
यथा कुमारो निष्कामः, १०२, ब्रह्म० उ० २
यथा ध्यानस्य संसर्गात्, १३७, कु० त० ९-१६
यदा कालीरूपम्, १०१, का० उ०
यदा नैव धाता न विष्णुः, ११४
यदा सा परमा शक्तिः, १२६
यस्मिन् जगद्बीजरूपं, १०१, दे० गी० १-३२

यस्य यस्य च मन्त्रस्य, १०९, २०४, भूत० त०
यस्याः स्मरणमात्रेण, ९७ गन्ध० त०
यस्यैकवारपठनात्, १३०, काली० स०
या देवी सर्वभूतेषु, १२७, दे० मा० ५-२९
या निशा सर्वभूतानां, ११५, भ० गी० २-६९
यामासाद्य च निर्वाण०, १०७,११९ यो० त० २-४
या शक्तिः सा महादेवी, १४२, रुद्र०
या शय्या परमेशानि, ११२, गन्ध० त०
युगादिसमये देवि, १४६
येन विज्ञानमात्रेण, ९८, निरु० त०
योगिनः साहजावस्था, १२२, महो० ४-७५
योगिनस्तत्प्रपश्यन्ति, ११८ कूर्म० अ० १२
योगेशं क्षोभमनयत्, १०८, श्या० क०
यो दाक्षिण्यं विना विप्रः, १४६, का० पु०
योनिमुद्रां समासाद्य,११६,१२६,घेर०सं० ७-१२
यो हविष्याशनरतः, १२८, तन्त्र०

र

रकारं कामदं देवि, १००, तोड० त०
रक्तवस्त्रपरीधानां, १४२, रुद्र०
रजः कीर्ण भगं नार्याः, १२३ मातृ० त०
रजोभिश्च समोपेतं, १२६, तारा० त० २
रात्रौ नग्नः शयानश्च, ११५ फे० त०
रात्रौ मन्त्रं च मालां च, ११५ का० क०
रो रक्तः क्रोजिनी रेफः, १०७ तन्त्राभि० १४८

ल

लक्षकोटिजपेनापि, १२४, कु० त० १५-५९
लक्ष्मन्द्रः पूतना पृथ्वी, १०३, तन्त्राभि० १४८

व

वाचिकस्य शतं ज्ञेयं, ११७, कौला० त०
वामदक्षिणमार्गो हि, १४४, शक्ति० त०
वामनेत्रेण संयुक्तं ९८, निरु० त०
वामा या दक्षिणं जित्वा, ११३, नि० त०
वामा सा दक्षिणं जित्वा, १०४, कामा० त०
विपरीतरतं देवं, १४६
विपरीतरता काली, ११३, निरु० त०
विपरीतेन रमते, ११३, गन्ध० त०
विप्रो यः पूजको वामः, १४७, का० पु०
विलासिनी विघ्नकर्त्री, १०२, तन्त्राभि० २२
विवाहितायाः कन्यायाः, १२३, मातृ० त०
विशुद्धज्ञानदेहाय, ९७, दे० वी० (कीलकम्) १
विश्वात्ममन्दो बलवान्, १०३, तन्त्राभि० १५०
विष्णोः शरीरग्रहणम्, ११४, दे० मा० १-८४
वृत्तं विलिख्य विधिवत्, १४३ का० त०
वृन्ताकं कुक्कुटत्वेन, १४४, बृह० रा०

श

शनैः शनैरविस्पष्टम्, १२५
शब्दबीजद्वयेनैव, १०२, याम०
शव इत्यक्षरे ब्रह्म, ११२, गा० त०
शशिसूर्यादिभिर्नेत्रैः, १११,महा०नि०त० १३-८
शान्तःशुचिर्मिताहारः,११६,कुल०त०१५-१११
शाश्वतं सुन्दरं शुभ्रं, १४६
शिवशक्तिसमायोगात्, १०२, गन्ध० त०
शिवशक्त्यात्मकं यन्त्रं, १२६, गन्ध० त०
शिवयोर्व्योमरूपत्वात्, १००, यो० वा०
शिवोपमं गुरुं ध्यात्वा, १०८, स० स्तो०
शुक्लाभा रक्तवर्णाभा, ११०, रा० त०
शुभं निरञ्जनं शुद्धं, ११८, कूर्म० अ १२
शेरतेऽत्र शवो भूत्वा, १११
श्मशानस्थो भवेत् सुस्थः, १२०, महा० सं०
श्यामां सूक्ष्मां सुच्छिद्रां, ११६, तन्त्र०
श्रद्धया श्रद्धया वापि, १०७, काली० स०
श्रीः कैटभारिहृदये, १०८, दे० मा० ५-१०
श्रीपुरं रमणोऽनङ्गः, १०३, तन्त्राभि० ५६
कालिका तारा, ९९, म० स०

श्रेय: प्राप्तिनिमित्ताय,९७,दे०मा०(कीलकम्), १

ष

षट्कोणात्तु बहिर्वृत्तं, १२५, का० त०

स

संपश्यति यतस्तस्मात्,१११,महा०नि०त०१३ ८
संस्थाप्य वामभागे तु, १४२, रुद्र०
स कवित्वेन रम्येण, १२३, मातृ० त०
स तु शक्तिं विना देवि, १४६, महा० सं०
सदा कालीरूपम्, १०१, का० उ०
सदाशिवेन देवेशि, १२२, गन्ध० मा० त०
सदा षोडशवर्षीयां, ११६, तन्त्र०
स पापी स्वर्गलोकात्तु, १४६, का० पु०
सर्वं खाल्विदं ब्रह्म, १२०, छा० उ० ३-१४-१
सर्वदा कालीरूपम्, १०८, का० उ०
सर्वमन्त्रमयी विद्या, ९८, निरु० त०
सर्ववृत्तिनिरोधात्, १२३, पात० सू० १-५१
सर्ववेदान्तवेदेषु, ११८, कूर्म० १२
सर्वस्वरूपे सर्वेशे, १२०, दे० मा० ११-२४
सर्वाभीष्टफलं दद्यात्, ९८, तारा० त० १
सर्वोपाधिविनिर्मुक्त, ११९, कूर्म० १२
सहजानन्दसंदोहै:, १२६
सालोक्यमपि सारूप्यं, १२८, शि० गी० १२-३
साहं सर्वं जगत्सृष्ट्वा, १११, दे० गी० २-३
सुन्दरी रक्तकालीयं, १०४, बृह० त०
सुशृङ्गाररसेनैव, ११६, १२६, घेर० सं० ७-१२
सुषुम्नावर्त्मना नित्यम्, १२८, बृह० त०
सूर्यकोटिप्रतीकाशं, १२४, शि० सं० ४-२
सूर्याग्रे वर्तते चित्तं, १२१, ज्ञान० स० त० ३६
स्त्रीरूपां वा स्मरेद्देवीं १०६, शि० ध०
स्थूलदेही तु विश्वाख्य:, ११०, दे० गी० १-४८
स्पर्धामुद्धूय कमला, ११०, भै० त०
स्वरेण संधयेद्योगम्, १००, ब्र० वि० ७
स्मरेद्वा निष्कलं ब्रह्म, १०६, शि० ध०
स्वकीयहृदये ध्यायेत्, १२४, तारा० त० २
स्वपन् तिष्ठन् व्रजन्मार्गे, १४७, पद्म०
स्वयं शक्तिमयो भूत्वा, ११६, गोर० सं०
स्ववीर्येण युतं कृत्वा, १२०, महा० सं०
स्वशक्तेश्च समायोगात्, १०१, दे० गी० १-७
स्वाचारनिरतो नित्यं, ११५, का० क्र०
स्वाशब्देन पदद्वन्द्वं, १०७, शाक्त० त०

ह

हकार: स्थूलदेह: स्यात्, १०४, दे० गी० ३-४२
हिरण्मये परे कोशे, १०४, मुण्ड० उ० २-१०
हूं तारा मे सदा पातु, ९९ ता० र०
हृत्पाद्मासनं दद्यात्, १२१, महा० नि० ५-१४३
ह्रींकारबीजोद्भवा, ९९ ता० र०
ह्रींकारमेव तव नाम, ९९, क्रम०
ह्रीं ह्रीमिति प्रतिदिनं, ९९, ,,

## ERRATA

| Page | Line | | Page | Line | |
|---|---|---|---|---|---|
| ९९ | २५ | यत: | ११४ | २० | कोऽपरो |
| १०४ | २० | ०समासौ | १२५ | २० | चिन्मात्रे |
| १०६ | २१ | तथा कामा० | १३८ | ६ | पाशबद्ध: |
| १११ | २४ | अभेदेन वि० | | | |

~0